श्रीः

श्रीमते रामानुजाय नमः

वचन सारम् (द्वितीयो भागः)

महोत्सव विषयाणि

उत्सव शब्दार्थ निर्वचनम्। पारमेश्वरे

सव इत्युच्यते दुःखं विद्वद्भिः समुदाहृतम्।

उद्गतः स सवो यस्मात् तस्मादुत्सव उच्यते। (ईश्वरे,)

अन्यत्र

महत्प्रीतिर्येण मम उत्सवेन भविष्यति।

उत्सूते हर्षमिति च तस्मादेव महोत्सवः। (श्रीः)

अन्यत्र

सव इत्युच्यते यज्ञो विद्वद्भिः साधु सम्मतेः।

उद्गतस्तु सवो यस्मात् तस्मादुत्सव मुच्यते। (नारदीये)

अन्यत्र

सवः सांसारिकं दुःखं उद्धरन्ति तदंबुधिम्।

यष्टार इतिच विद्वंसो निवृत्यन्ते उत्सवाह्वयम्। (पाद्मे)

अन्यत्र

सवो दुःखं समाख्यातं विनाश उपसर्गतः।

उद्गतस्तु सवो येन उत्सवः परिकीर्तितः। (पाद्मोद्भवं)

अन्यत्र

उत्सवं संप्रवक्ष्यामि विस्तरेण तवानघ।

सवस्त्वमङ्गलं विद्धि उत्सवःस्तन्निवर्तकः। (अनिरुद्धं)

आचार्यस्य भगवदनुज्ञाशासनमाह

आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः।

तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत। (सात्वते)

आचार्यस्य वपन स्नान दीक्षा विधिः।

अंकुरात् त्रिदिनात्पूर्वं आचार्यः क्षौरमाचरेत्।

तुळसी मृत्तिकाभिश्च शिखाद्याऽऽपाद लेपनम्।

गोमयेनाङ्गलेपं च शिखाद्यापाद लेपनम्।

प्राणायामं तु संकल्पं जलमध्येतु देशिकः।

पञ्च वारुणसूक्तेन स्नानं तर्पणमाचरेत्। (परमसंहिता)

<u>अन्यत्र</u>

प्रातःस्नातः शुक्लवासस्तप्तमुद्रादि धारकः।

धृतोर्ध्वपुण्ड्रकः स्रग्वी यजमानश्च देशिकः।

वैदिकै र्विप्रवर्यैस्तु सार्धं स्नपन मण्डपम्। (पाद्मोद्भवं)

वर्णाश्रम भेदेन ऊर्ध्वपुण्ड्रस्य मृत्तिका,आकाराणां भेदाश्च

ब्राह्मणस्य मृत्प्रोक्तं क्षत्रियस्यतु चन्दनम्।

वैश्यस्य बिल्वकाष्ठं स्याच्छूद्राणां भस्ममुच्यते।

ऊर्ध्वपुण्ड्रं द्विजातीनां क्षत्रियस्यार्ध चंद्रकम्।

वैश्यस्य वर्तुलाकारं शूद्राणां च त्रिपुण्ड्रकम्। (विहगेन्द्रं)

अन्यत्र

वेदव्रतेषु चतुर्षु प्रारंभे याग कर्मणि।

वसुधासंग्रहे काले शिलासंग्रह कर्मणि।

शंकुस्थापन काले च ध्वजारोहण कर्मणि।

विविधासु प्रतिष्ठासु भाह्यान्तर कर्मसु।

आचार्यत्वे कृते कर्ता वपनं स्नानमाचरेत्।

वपनेन विना कर्मा यदितन्निष्फलं भवेत्। (अनन्ताख्ये)

अन्यत्र

एवं तु ध्वजमुत्थाप्य गुरुःपश्चात् समाहितः।

देवानां केशवादीनां मन्त्रैद्वादशभिः क्रमात्।

द्वादशाहं व्रतं कुर्यात् यात्रारंभदिनादितः।

स्नानार्चनादिकं कृत्वा पीत्वा तच्चरणोदकम्।

कुशोदकसमायुक्तं जपेद्वै द्वादशाक्षरम्।

नैवेद्य प्राशनं पूर्वं कुर्यान्नक्ताशनं द्विज।

जपेद् द्वादशनामानि क्रमाद्वाच्यमनुस्मरन्। (पारमे)

संकल्प विषयस्य लक्षणमाह

गुरुध्यानं पुराकृत्वा मां भजेत्कमलासन।

कर्मस्थलं तथावर्षं ऋतु मासस्तथाऽयनम्।

तिथिवारं च नक्षत्र योगं करणमेव च।

उक्त्वा कर्मकरोती चोक्तस्संकल्प उच्यते। (वि-तिलके)

उत्सवेषु भेदाः तल्लक्षणं च

नित्ये नैमित्तिके काम्यस्त्रिविधः स महोत्सवाः।

वत्सरे वत्सरे यस्तु क्रियते स तु नित्यकः।

भूमि कम्पे दिशांदाहे महोत्पादादि सत्सु च।

दुर्भिक्षे व्याधितेराष्ट्रे तथा वै शत्रुसंकटे।

अनावृष्ट्यादि सर्वत्र नक्षत्र पतने च खात्।

हसने भगवन्मूर्तौरङ्गानां चलने सति।

रोदनेहासने बिम्बे परिभ्रमति सत्तम।

व्यत्यासे शशि सूर्यस्य तयोरन्येष्येवमादिषु।

शान्त्यर्थं यत्प्रकुर्वीत स नैमित्तिक उच्यते।

चतुर्णां पुरुषार्थानामुद्दिश्याऽन्यतमं फलम्।

उत्सवेऽनुष्टितः काम्यः संकल्पित फलप्रदः।(पाद्मे,ईश्वरे,नारदीये)

<u>अन्यत्र</u>

बिम्बाऽऽविर्भावऋक्षे वा प्रतिष्ठा तारकेपि च।

तत्तिथौ वा तीर्थयात्रां निश्चित्याङ्कुर पूर्वकम्।

ध्वजमारोप्यते यस्तु स तु नित्योमहोत्सवः। (विष्वक्सेनं)

<u>अन्यत्र</u>

बिम्बाऽऽविर्भाव ऋक्षेवा प्रतिष्ठातारकेपि वा।

तत्तिथौ वा तीर्थयात्रा निश्चित्यांकुर पूर्वकम्।

ध्वजमारोप्यते यस्मिन् स तु नित्यो महोत्सवः।

ग्रहणे ग्रह युद्धे च महोत्पातादि संभवे।

जीर्णोद्धारे तु देवस्य प्रोक्षणे राजविङ्वरे।

गुरौ तु सिंहसंबन्धं मखायाते य उत्सवः।

ध्वजारोहण पूर्वस्तु स हि नैमित्तिकः स्मृतः।

राज्ञो जन्मदिनेवाऽपि तत्साम्राज्याऽभिषेचने।

अर्थकामो समुद्दिश्य मासऋक्षादिषु वै रमे।

रोहिण्यां च पुनर्वस्वौ श्रवणे सार्वामासिकम्।

धवजारोहण पूर्वस्तु काम्यस्सोपि महोत्सवः।(श्रीः)

उत्सवेषु सात्विकादि त्रिविध लक्षणानि

महोत्सवः सात्विकस्यात् तीर्थस्तु नवमेऽहनि।

सप्तमं पञ्चमं तीर्थो राजसस्तामस स्मृतः।

नित्यं तु सात्विकं प्रोक्तं नैमित्तं राजसं भवेत्।

काम्यस्या त्तामसःप्रोक्तो उत्सवः त्रिविधः क्रमात्। (श्रीः)

उत्सवे त्रयोदशविधाः

एक त्रि पञ्च सप्ताहो नवाहश्च पर स्मृतः।

द्वादशाहेऽर्धमासाश्च एकविंशति वासरः।

सूक्ष्मः,स्थूलः सप्तविंशद्दिनो मासस्तथा ऋतुः।

षण्मास अब्दमेकं तु उत्सवं च त्रयो दश।(पारमे, परमे)

मुख्य कल्प अनुकल्प उत्सव लक्षणं

उत्सवाहर्गणात्पूर्वं यथोक्त वासरे द्विज।

ध्वजारोहणं कृत्वा तत्पश्चात् क्रियते तु यः।

मुख्यकल्पमिदं विद्धि, दैवाद्वा मानुषात्तु वा।

कुतश्चित्कारणाद्विप्र पूर्वमुक्ते तु वासरम्।

न कल्पिते ध्वजारोहं तु उत्सवारंभ वासरे।

ध्वजस्य आरोहणं कृत्वा तत्पश्चात् क्रियते तु यः।

अनुकल्पमिदं विद्धि ह्येषां तु द्विविधं स्मृतः। (पारमे)

<u>अन्यत्र</u>

उत्सवंह्युत्तमोविद्धि त्रिवारं प्रतिवत्सरम्।

द्विवारं मध्यमं प्रोक्तं एकवारं कनीयसम्। (पारमे)

उत्सवे मुख्य कल्प अनुकल्प भेदेन द्विविध लक्षणं

कलशे मण्डले बिम्बे वह्निं च यजनं विभोः।

नित्यशः क्रियते यत्र मुख्य कल्पः सकीर्तितः।

बिम्बे व ह्नौ च यजनं यत्रस्यात् सोऽनुकल्पकः। (पारमे)

बिम्ब भेदेन उत्सवे उत्तमादि विभेदाः

उत्तमादि विभेदेन तत्र च उत्सव कौतुके।

क्रियते ह्युत्सवो यस्तु स उत्तम उदाहृदः।

नित्यस्नपन बिम्बे तु स मध्यम स्मृतः।

बिम्बे नित्योत्सवार्थं तु यःस्यात् स तु कनीयसम्।

कुम्भे वा विष्टरे चक्रे स आभास संज्ञिकः। (पारमे)

पञ्चाग्नि कुण्डेषु हवन भेदेन उत्सवे उत्तमादि भेदाः

आवसथ्यस्य शिखिनःपंचम्यामुत्सवमुत्तमम्।

यद्वाऽऽवसथ्य रहितं चतुरग्निं चतुर्दिशम्।

सभ्याऽऽवसथ्य रहितं यद्वाऽग्नित्रय संयुतम्।

एकमाहवनीयं वा कल्पयेत् कर्तुरिच्छया। (पाद्मं)

उत्सवे अंकुरार्पणादि कर्मभेदेन त्रिविध भेदाः

भेरीताटनमन्वक्क पालिकास्वंकुरार्पणम्।

आघोष्य भेरीं प्रथमं ध्वजारोहणमन्वतः।

ततोंकुरार्पणं यद्वा,यद्वा निश्यंकुरार्पणम्।

प्रदोषे तु ध्वजारोहो भेरीताटनमन्वतः।

तत्कालेपि ध्वजारोहं त्रिविधं चतुरानन। (पाद्मे)

तेषांकर्मभेदेन फलभेदाः

ध्वजारोहण पूर्वस्तु राजराज्य सुखप्रदः।

देवताह्वान पूर्वस्तु स्वर्गभोग फलं तथा।

अङ्कुरार्पणपूर्वस्तु सर्वेषां मोक्षदं भवेत्। (पारमे)

<u>अन्यत्र</u>

दिवौवारोपयेद्देवं भूमिगानां तु वृद्धये।

अन्तरिक्षचराणां तु रात्रौ कुर्वीत वृद्धये। (सनकं)

उत्सवे उत्तमादि भेदाः

उत्सवः त्रिविधः प्रोक्त उत्तमादि विभेदतः।

उत्तमो मास इत्युक्तः मध्यमः पक्ष उच्यते।

नवाहस्त्वधमः प्रोक्त इति शास्त्रस्य निश्चयः। अनिरुद्धं)

उत्सव दिनभेदेन नाम भेदाः

नवाहं दैविकंप्रोक्तं सप्ताहं आर्षकं भवेत्।

पञ्चाहं ऐन्द्रनामोक्तं त्रयहं शैवमुच्यते।

एकं तु ब्राह्ममित्युक्तं उत्सवो पञ्चधाभवेत्। (विहगेन्द्रे)

अन्यत्र

नवाहं दैविकं प्रोक्तं सप्ताहं मध्यमं भवेत्।

पञ्चाहमधमं विद्धि त्रिविधं चे दुत्सवंस्मृतम्। (ई)

तेषां फलानि

दैविकं सर्वशान्त्यर्थं राज्यवर्धनमार्षकम्।

ऐन्द्रं दुर्भिक्ष नाशार्थं शैवं रोगविनाशकम्।

ब्राह्मं तु ब्रह्म वृद्धिश्च उत्सवं पञ्चकं फलम्। (विष्वक्सेनम्)

तीर्थयात्रा दिन निर्णयम् (नारदीये)

तीर्थयात्रानुगुण्येन ध्वजारोहं प्रकल्पयेत्।

चैत्रादिषु च मासेषु श्रवणव्रषाऽयनद्वये।

विषुवद्वितये वाऽपि चन्द्र सूर्य उपरागयोः।

द्वादश्यां पौर्णमास्यां च दर्शे च नवमी तिथौ।

मासव्रषोपि च रोहिण्यां तथा चोत्तरफल्गुणौ।

पुनर्वस्वाख्य नक्षत्रे प्रतिष्ठा दिवसेऽपि वा।

नगर ग्राम जन्मर्क्षे प्रासदारम्भस्य वासरे।

राज्ञां जन्मदिने वापि अभिषेक दिनेपि वा।

एकस्मिन्नेषुसर्वेषु तीर्थयात्रां समाचरेत्। (ईश्वरे,पारमेश्वरे,श्रीः

अन्यत्र

शुभनक्षत्रयोगे च तिथिवार निशीथया।

प्रतिष्ठा ऋक्षकेवापि नगरग्राम ऋक्षके।

राज्ञःस्वजन्म नक्षत्रे यजमानेच्छया कुरु। (विष्वक्सेनम्)

अवभृतकाल निर्णय विधिः

पर्व संपूर्णसंयुक्तं ऋक्षा च बहुळा यदि।

अन्येद्युःकलयापूर्णा ऋक्षा च कलया यदि।

तद्दिने दिवसं योग्यं महापातक नाशनम्।

पूर्वे वै वर्जयेद्धीमान् अन्येद्युःतीर्थमाचरेत्। (जयोत्तरं)

अन्यत्र

द्विवारयुक्ते तीर्थर्क्षे पुरुहूतर्क्षणान्वितम्।

पुण्यंभवेत्तत्पूर्वस्यादुभयो र्विद्यते यदि। (पारमे)

महोत्सवादिषु आचार्य संख्या विवरणमाह

आचार्यश्चतुरो विप्राः षडष्टौ द्वादशाऽपि वा।

यजमानस्तु वरयेत् शास्त्रज्ञान् गुरुणा सह।

प्रवीणांश्च बहुत्वेतु तत्संख्या नियतिः कृता।

तेषां यथोक्त संख्यानामभिज्ञानमसन्निधौ।

तादृशान् वरयेद्विप्राश्चतु स्त्रि द्वि एकमेव वा।

साधकांश्चतुरः षड्वा अष्टौ द्वादश षोडश।

वरयेच्छास्त्र कुशलान् प्रवीणानुक्तकर्मसु।

एवं सर्वेषु यागेषु नित्यनैमित्तिकात्मसु।

आचार्याणां साधकानां संख्या नियम ईरितः।(ई)

आचार्यवरण विधिः

अन्तर्मण्डप कुण्डेषु ऋत्विजान् षोडशःक्रमात्।

ऋग्भिःपुरुषसूक्ताभिः वृणुयाद्वैष्णवान्सदा।

ततः स्वनामभिश्चान्यै वृणुयाद्वेदपारगान्।(अहिर्बुध्न्ये)

****

उत्सवे कार्यक्रमाणि

अङ्कुरावापनं पूर्वं पताकारोहणं तथा।

कौतुकस्योत्सवं पश्चात् उत्सवारंभणं भवेत्।

स्नपनं देवदेवस्य यागदीक्षाह्यनन्तरम्।

चतुस्थानार्चनं चैव होमकर्माण्यनन्तरम्।

तीर्थाङ्कुरार्पणं चैव ग्रामस्य बलिं तथा।

यात्राचोत्सवबिम्बस्य तथा तीर्थाधिवासनम्।

तीर्थस्नानं ततः कुर्यात् पुष्पयागमनन्तरम्।

ध्वजाऽवरोहणं चैव उद्वासन बलिं तथा।

विष्वक्सेनार्चनं चैव कार्यक्रममिमं विदुः।(अनिरुद्धं)

<u>अन्यत्र</u>

उत्सवेषु पञ्चोत्तरदश कार्याणां विवरणमाह

पञ्चोत्तरदशाङ्गं च कथ्यते तानुक्रमात्।

प्रथमंचाङ्कुरावापः पताकारोहणं ततः।

शुद्धस्नानं त्रितीयं च स्नपनं तु ततःपरम्।

अङ्कुरस्योत्सवं पश्चात् होमंस्यात् भूषणं ततः।

अष्टमं तु बलिं दद्यात् नवमं तु महोत्सवम्।

तीर्थाधिवासनं पश्चात् तीर्थस्नानमनन्तरम्।

द्वादशं स्नपनं विद्यात् पुष्पयागमनन्तरम्।

दक्षिणा संप्रदानं च ध्वजमप्यवरोहणम्।

पञ्चोत्तर दशाङ्गोऽप्युत्सवः परिकीर्तितः। (विष्णु)

भगवदनुज्ञादिषु कार्येषु कदळीफलादीनां संख्या विधिः

सौवर्णं राजतेवापि पात्रे कलम तण्डुलैः।

खारिद्वया त्तदर्धेन यद्वा पादेनसम्मिते।

न्यसेत्सूत्रं च सौवर्णं क्षौमं कार्पासमेव वा।

सप्तभिः पपंभिर्वापि सूत्रंक्षौमादि तन्तुभिः।

शतेनषष्ट्यारूढेन फलैः क्रमुकैरपि।

नागवल्लीदलैस्सार्धं फल संख्या चतुर्गुणैः।

तदर्धैर्वा तदर्धैर्वा कदल्यादि फलैरपि।

सार्धं तदनु तत्पात्रं साधारं न्यस्य मूर्धनि।

वस्त्रेणाच्छादितं छत्रचामरव्यजनान्वितम्। (पाद्मे)

मृत्संग्रहणविषयाः

अंकुरार्पणादि कार्याणि कर्तव्य मण्डपस्य उत्तमादि भेदाः

चतुरश्रं समं वापि प्राक्पश्चिम दिगायतम्।

सौम्य याम्यायतं वापि कर्तुमिच्छानु रूपतः।

तथा प्रागाननं यद्वा यथाभिमत दिङ्मुखम्।

द्वात्रिं शति धनुर्मानं मण्टपंचोत्तमं भवेत्।

अष्टादश धनुर्मानं मण्टपम्मध्यमं भवेत्।

अधमं द्वादश धनुर्मानं स्यादथवा द्विजः। (ई)

मृत्संग्रहण,अंकुरार्पणादिकार्य स्थलविशेषाणि

श्रीगृहे मण्टपे बिल्वे तुळसी यत्र तत्र च।

विष्णुक्षेत्रे तथा दिव्ये मृत्संग्रहण माचरेत्।

केवले वा शुचौदेशे मृदंशुद्धं समाहरेत्।

अंकुरार्पणस्याऽपि शुभनक्षत्र तिथि विशेषः

नक्षत्रे शोभने पूज्य पूजकालानुगुणे तिथौ।

वारयोगादिके मुख्ये प्रारभेदंकुरार्पणम्।

कारकस्यानुकूल्येन शुभग्रह निरीक्षिते।

शुभऋक्षे शुभतिथौ रिक्ता तिथि त्रयं विना।

स्वस्तिवाचन पूर्वं तु सुगुप्तेस्थापयेत्क्रमात्। (सनत्कुमारं)

<u>अन्यत्र</u>

संक्रान्त्यांकथने सोम सूर्यग्रहणे तथा।

शुभनक्षत्र योगे च नाम ऋक्षेऽथवा मुने।

अंकुरार्पण कार्ये तु कारयेत्सर्व कर्मणि। (कपिञ्जलं)

मृत्संग्रहणस्य दिङ्निर्णय विधिः,फलानिच

उदीच्यां प्राप्यते शांतिः प्राचींवापि दिशं व्रजेत्।

इत्थं मृत्ग्रहणे शस्तं सुखायैव नृणां भवेत्।

यदिगच्छेद्दिशश्चाऽन्यां सर्व दुःखाय वै भवेत्। (परमं)

मृत्संग्रहण काले परिभ्रमण देवताः

पर्व संपूर्णसंयुक्तं ऋक्षा च बहुळा यदि।

अन्येद्युःकलयापूर्णा ऋक्षा च कलया यदि।

तद्दिने दिवसं योग्यं महापातक नाशनम्।

पूर्वे वै वर्जयेद्धीमान् अन्येद्युःतीर्थमाचरेत्। (जयोत्तरं)

<u>अन्यत्र</u>

द्विवारयुक्ते तीर्थव्रषे पुरुहूतव्रषणान्वितम्।

पुण्यंभवेत्तत्पूर्वस्यादुभयो र्विद्यते यदि। (पारमे)

महोत्सवादिषु आचार्य संख्या विवरणमाह

आचार्यश्चतुरो विप्राः षडष्टौ द्वादशाऽपि वा।

यजमानस्तु वरयेत् शास्त्रज्ञान् गुरुणा सह।

प्रवीणांश्च बहुत्वेतु तत्संख्या नियतिः कृता।

तेषां यथोक्त संख्यानामभिज्ञानमसन्निधौ।

तादृशान् वरयेद्विप्राश्चतु स्त्रि द्वि एकमेव वा।

साधकांश्चतुरः षड्वा अष्टौ द्वादश षोडश।

वरयेच्छास्त्र कुशलान् प्रवीणानुक्तकर्मसु।

एवं सर्वेषु यागेषु नित्यनैमित्तिकात्मसु।

आचार्याणां साधकानां संख्या नियम ईरितः।(ई)

आचार्यवरण विधिः

अन्तर्मण्डप कुण्डेषु ऋत्विजान् षोडशःक्रमात्।

ऋग्भिःपुरुषसूक्ताभिः वृणुयाद्वैष्णवान्सदा।

ततः स्वनामभिश्चान्यै वृणुयाद्वेदपारगान्। (अहिर्बुध्न्ये)

उत्सवे कार्यक्रमाणि

अङ्कुरावापनं पूर्वं पताकारोहणं तथा।

कौतुकस्योत्सवं पश्चात् उत्सवारंभणं भवेत्।

स्नपनं देवदेवस्य यागदीक्षाह्यनन्तरम्।

चतुस्थानार्चनं चैव होमकर्माण्यनन्तरम्।

तीर्थाङ्कुरार्पणं चैव ग्रामस्य बलिं तथा।

यात्राचोत्सवबिम्बस्य तथा तीर्थाधिवासनम्।

तीर्थस्नानं ततः कुर्यात् पुष्पयागमनन्तरम्।

ध्वजाऽवरोहणं चैव उद्वासन बलिं तथा।

विष्वक्सेनार्चनं चैव कार्यक्रममिमं विदुः।(अनिरुद्धं)

<u>अन्यत्र</u>

उत्सवेषु पञ्चोत्तरदश कार्याणां विवरणमाह

पञ्चोत्तरदशाङ्गं च कथ्यते ताननुक्रमात्।

प्रथमंचाङ्कुरावापः पताकारोहणं ततः।

शुद्धस्नानं त्रितीयं च स्नपनं तु ततःपरम्।

अङ्कुरस्योत्सवं पश्चात् होमंस्यात् भूषणं ततः।

अष्टमं तु बलिं दद्यात् नवमं तु महोत्सवम्।

तीर्थाधिवासनं पश्चात् तीर्थस्नानमनन्तरम्।

द्वादशं स्नपनं विद्यात् पुष्पयागमनन्तरम्।

दक्षिणा संप्रदानं च ध्वजमप्यवरोहणम्।

पञ्चोत्तर दशाङ्गोऽप्युत्सवः परिकीर्तितः। (विष्णु)

भगवदनुज्ञादिषु कार्येषु कदळीफलादीनां संख्या विधिः

सौवर्णं राजतेवापि पात्रे कलम तण्डुलैः।

खारिद्वया त्तदर्धेन यद्वा पादेनसम्मिते।

न्यसेत्सूत्रं च सौवर्णं क्षौमं कार्पासमेव वा।

सप्तभिः पपंभिर्वापि सूत्रंक्षौमादि तन्तुभिः।

शतेनषष्ट्यारूढेन फलैः क्रमुकैरपि।

नागवल्लीदलैस्सार्धं फल संख्या चतुर्गुणैः।

तदर्धैर्वा तदर्धैर्वा कदल्यादि फलैरपि।

सार्धं तदनु तत्पात्रं साधारं न्यस्य मूर्धनि।

वस्त्रेणाच्छादितं छत्रचामरव्यजनान्वितम्। (पाद्मे)

मृत्संग्रहण विषयाः

अंकुरार्पणादि कार्याणि कर्तव्य मण्डपस्य उत्तमादि भेदाः

चतुरश्रं समं वापि प्राक्पश्चिम दिगायतम्।

सौम्य याम्यायतं वापि कर्तुमिच्छानु रूपतः।

तथा प्रागाननं यद्वा यथाभिमत दिङ्मुखम्।

द्वात्रिं शति धनुर्मानं मण्टपंचोत्तमं भवेत्।

अष्टादश धनुर्मानं मण्टपम्मध्यमं भवेत्।

अधमं द्वादश धनुर्मानं स्यादथवा द्विजः।(ई)

मृत्संग्रहण,अंकुरार्पणादिकार्य स्थलविशेषाणि

श्रीगृहे मण्टपे बिल्वे तुळसी यत्र तत्र च।

विष्णुक्षेत्रे तथा दिव्ये मृत्संग्रहण माचरेत्।

केवले वा शुचौदेशे मृदंशुद्धं समाहरेत्।

अंकुरार्पणस्याऽपि शुभनक्षत्र तिथि विशेषः

नक्षत्रे शोभने पूज्य पूजकालानुगुणे तिथौ।

वारयोगादिके मुख्ये प्रारभेदंकुरार्पणम्।

कारकस्यानुकूल्येन शुभग्रह निरीक्षिते।

शुभऋक्षे शुभतिथौ रिक्ता तिथि त्रयं विना।

स्वस्तिवाचन पूर्वं तु सुगुप्तेस्थापयेत्क्रमात्। (सनत्कुमारं)

<u>अन्यत्र</u>

संक्रान्त्यांकथने सोम सूर्यग्रहणे तथा।

शुभनक्षत्र योगे च नाम ऋक्षेऽथवा मुने।

अंकुरार्पण कार्ये तु कारयेत्सर्व कर्मणि। (कपिञ्जलं)

मृत्संग्रहणस्य दिङ्निर्णय विधिः,फलानिच

उदीच्यां प्राप्यते शांतिः प्राचींवापि दिशं व्रजेत्।

इत्थं मृत्ग्रहणे शस्तं सुखायैव नृणां भवेत्।

यदिगच्छेद्दिशश्चाऽन्यां सर्व दुःखाय वै भवेत्। (परमं)

मृत्संग्रहण काले परिभ्रमण देवताः

विष्वक्सेनं तु वा ताक्ष्यं हनुमत्प्रमुकं तु वा।

हेतीशं वापि वस्त्राद्यैरलंकृत्य विशेषतः। (ई)

मृत्संग्रहणस्य क्षेत्र निर्णयं

ग्रामस्य वास्तुभागस्य गत्वा देशे मनोरमे।

नदी तीरेषु तीर्थेषु देवतायतनेषु च।

पर्वतेषु प्रशस्तेषु आरामेषु तथैव च।

गोवालैर्मजयेत् क्षेत्रं शुqद्ध कृत्वा विचक्षणः।

तत्र मृत्संग्रहणं कार्यं देव्या चैव तु शासनात्। (श्रीधरीये)

मेदिनी देव्याः मुखादीनां लेखनीय विधिः

मेदिनीं ऊर्ध्व वक्रान्तां ईशान्ये न्यस्त मौलिकाम्।

नैऋ तिन्यस्तपादान्तां नवतालं लिखेत्सुधीः।विष्णुतत्वे)

खनित्रस्य लक्षणमाह

खनित्रस्य लक्षणं वक्ष्ये द्वादशाङ्गुल दीर्घकम्।

प्रादेशेनैव विस्तीर्णं घणमेकाङ्गुलं भवेत्।

पुच्छं षडङ्गुलं प्रोक्तं अग्रे दण्ड समन्वितम्।

तत् दण्डं च धनुर्मानं मूले रन्द्रसमन्वितम्। (वासिष्टे)

मृत्संग्रहण कालभेदेन शिरोदिग्भेदाः

मध्याह्वे प्राक्शिरो भूत्वा सायाह्वे दक्षिणो शिरः।

अर्धरात्रे तु वारुण्यां उषक् प्रत्यक् शिरो भवेत्। (वि-तत्वे)

मृत्संग्रहणमन्त्रः,हरणस्थानानि च

मेदिनीं मन्त्रमुच्छार्य मेदिनीं मुखदेशतः।

तद्बाह्वोः स्तनयोर्मध्ये जठरे तु मृदं हरेत्।

स्थानभेदेन फलभेदाश्च

मुखे च सर्वतोह्यविघ्नं बाह्वोः बहु सुवर्णतः।

स्तनयोः कुलवृद्धिस्यात् जठरे सर्व संपदः।

भवत्यन्ते तु व्यत्यासे सर्वं नाशयते धृवम्।

उदङ्मुखो खनित्रेण प्राङ्मुखोवाऽथ देशिकः।

कालमात्रं व्यपोह्यैव मृदमाहृत्य वै तथा। (विहगेन्द्रे)

अंकुरार्पण विषयाः

अंकुरार्पणे पालिकादीनां स्थान निर्णयः

पालिका दक्षिणे स्थाप्या मध्यमे घटिकास्तथा।

उत्तरेषु शरावाश्च पालिकाद्या यथा क्रमम्। (श्रीः)

<u>अन्यत्र</u>

आग्नेये दक्षिणे भागे नैऋतेपि च पालिकाः।

घटिका वारुणे ब्राह्मे तथा पौरन्दरेपि च।

शरावामारुते सौम्ये ईशाने च यथा विधिः। (ई- पारमेच)

अंकुरार्पणे पालिकादीनां उत्तमादि विषयः

अष्टोत्तरशतं चैव उत्तमं परिकीर्तितम्।

तदर्धं मध्यमं प्रोक्तं तदर्धमधमं भवेत्।

षोडशं द्वादशं वापि अष्टकं वा समाचरेत्। (अनिरुद्धं)

अंकुरार्पणे पालिकादीनां लोहविषये

सौवर्णीं पालिकां कुर्यात् राजतीं घटिकाकृतिम्।

ताम्रमेव शरावं स्यात् सर्वं ताम्रमयं तु वा। (सात्वते)

उत्सवदिनभेदेन अंकुरार्पणे धान्य भेदाः

अंकुरं त्रिविधं प्रोक्तं बीज प्ररोह तण्डुलम्।

बहुवारेतु बीजंस्यात् अल्पवारे प्ररोहकम्।

सद्यःकाले विशेषेण तण्डुलं सं प्रचक्ष्यते। (अनिरुद्धं)

पुष्पांकुरविषये(श्रीः-३७ अ)

यद्वा तत्कालजैःपुष्पैः सात्विकैः सुमनोहरैः।

स्थापयेत्पालिकादींश्च क्षाळयेन्मन्त्रपूर्वकम्।

सुगन्धिचन्दनैस्तेषां बिंबमूलानि पूरयेत्।

बिलानिपूरयेत् तेषां निशाचूर्णाक्षतैस्ततः।

सोमकुम्भं च तद्वोमं वर्जयेदत्र कर्मणि।

प्रोक्ष्य पुण्याहतोयेन कुम्भमण्डल पालिकाः।

अष्टोत्तर शत पालिकास्थापन कालाः

महोत्सवे धवजारोहेह्युत्सवाऽवसरे यथा।

पात्राणां पालिकादीनां अष्टोत्तर शतम् मतम्। (पारमे)

पालिकादीनां लक्षणमाह

पालिकाः घटिकाश्चैव शरावास्तत्र पूर्वतः।

सौवर्णाः राजसस्ताम्रा मृण्मयावाऽपि ब्राह्मणाः।

पालिका मुखविस्तारं षोडशाङ्गुलमुच्यते।

तस्यांकण्ठञ्चपादञ्च कुर्यादष्टाङ्गुलं तथा।

शरावाणां मुखंकुर्याद् द्वादशाङ्गुल विस्तृतम्।

चतुर्दिक्स्थित वक्राणां विस्तृतं चतुरङ्गुलम्।

घटिकाःपञ्चवक्राः स्युर्मध्ये षडङ्गुलं तथा।

सर्वेषां पादपीठानि विस्तृतानि दशाङ्गुलम्।

चतुरङ्गुलमौन्नत्यमङ्गुलं कण्ठमुच्यते। (पाद्मोद्भवं)

पालिकादीनां अधिदेवतानां निर्णयः

घटिकाणां विधातारं पालिकानां जनार्दनम्।

ईशानं च शरावाणोध्यात्वामभ्यर्च्य यथा विधि। (पाद्मे)

<u>अन्यत्र</u>

संकर्षणांशजं विष्णुं पालिकासु यजेद्रमे।

अनिरुद्धांश संभूतं ब्रह्माणं घटिकासु च।

प्रद्युम्नांशजं शर्वं शरावेषु सरोद्भवे। (श्रीः)

अन्यत्र

अञ्जनाभं परं चैव पद्मनाभं ध्रुवं तथा।

पात्र स्कन्धत्रिके विप्राः क्रमेण परिपूजयेत्। (ईश्वरे)

अन्यत्र

पालिका वैष्णवी ज्ञेया ब्राह्मी तु घटिका स्मृता।

शरावं शैवमित्युक्तं प्रत्येकं द्वादशाहरेत्। (पाद्मोद्भवं)

उत्तमोत्तम पालिकानां स्थापने षड्विंशद्देवताःनामानि

अवभृत काल निर्णय विधिः

पर्व संपूर्णसंयुक्तं ऋक्षा च बहुळा यदि।

अन्येद्युःकलयापूर्णा ऋक्षा च कलया यदि।

तद्दिने दिवसं योग्यं महापातक नाशनम्।

पूर्वे वै वर्जयेद्धीमान् अन्येद्युःतीर्थमाचरेत्। (जयोत्तरं)

अन्यत्र

द्विवारयुक्ते तीर्थव्रषे पुरुहूतव्रषणान्वितम्।

पुण्यंभवेत्तत्पूर्वंस्यादुभयो र्विद्यते यदि। (पारमे)

महोत्सवादिषु आचार्य संख्या विवरणमाह

आचार्यश्चतुरो विप्राः षडष्टौ द्वादशाऽपि वा।

यजमानस्तु वरयेत् शास्त्रज्ञान् गुरुणा सह।

प्रवीणांश्च बहुत्वेतु तत्संख्या नियतिः कृता।

तेषां यथोक्त संख्यानामभिज्ञानमसन्निधौ।

तादृशान् वरयेद्विप्राश्चतु स्त्रि द्वि एकमेव वा।

साधकांश्चतुरः षड्वा अष्टौ द्वादश षोडश।

वरयेच्छास्त्र कुशलान् प्रवीणानुक्तकर्मसु।

एवं सर्वेषु यागेषु नित्यनैमित्तिकात्मसु।

आचार्याणां साधकानां संख्या नियम ईरितः।(ई)

आचार्यवरण विधिः

अन्तर्मण्डप कुण्डेषु ऋत्विजान् षोडशःक्रमात्।

ऋग्भिःपुरुषसूक्ताभिः वृणुयाद्वैष्णवान्सदा।

ततः स्वनामभिश्चान्यै वृणुयाद्वेदपारगान्। (अहिर्बुध्न्ये)

उत्सवे कार्यक्रमाणि

अंकुरावापनं पूर्वं पताकारोहणं तथा।

कौतुकस्योत्सवं पश्चात् उत्सवारंभणं भवेत्।

स्नपनं देवदेवस्य यागदीक्षाह्यनन्तरम्।

चतुस्थानार्चनं चैव होमकर्माण्यनन्तरम्।

तीर्थाङ्कुरार्पणं चैव ग्रामस्य बलिं तथा।

यात्राचोत्सवबिम्बस्य तथा तीर्थाधिवासनम्।

तीर्थस्नानं ततः कुर्यात् पुष्पयागमनन्तरम्।

ध्वजाऽवरोहणं चैव उद्वासन बलिं तथा।

विष्वक्सेनार्चनं चैव कार्यक्रममिमं विदुः। (अनिरुद्धं)

अन्यत्र

उत्सवेषु पञ्चोत्तरदश कार्याणां विवरणमाह

पञ्चोत्तरदशाङ्गं च कथ्यते तानानुक्रमात्।

प्रथमंचाङ्कुरावापः पताकारोहणं ततः।

शुद्धस्नानं त्रितीयं च स्नपनं तु ततःपरम्।

अंकुरस्योत्सवं पश्चात् होमंस्यात् भूषणं ततः।

अष्टमं तु बलिं दद्यात् नवमं तु महोत्सवम्।

तीर्थाधिवासनं पश्चात् तीर्थस्नानमनन्तरम्।

द्वादशं स्नपनं विद्यात् पुष्पयागमनन्तरम्।

दक्षिणा संप्रदानं च ध्वजमप्यवरोहणम्।

पञ्चोत्तरदशाङ्गोऽप्युत्सवः परिकीर्तितः। (विष्णु)

भगवदनुज्ञादिषु कार्येषु कदळीफलादीनां संख्या विधिः

सौवर्णं राजतेवापि पात्रे कलम तण्डुलैः।

खारिद्वयात्तदर्धेन यद्वा पादेनसम्मिते।

न्यसेत्सूत्रं च सौवर्णं क्षौमं कार्पासमेव वा।

सप्तभिः पपंभिर्वापि सूत्रंक्षौमादि तन्तुभिः।

शतेनषष्ट्यारूढेन फलैः क्रमुकैरपि।

नागवल्लीदलैस्सार्धं फल संख्या चतुर्गुणैः।

तदर्धैर्वा तदर्धैर्वा कदल्यादि फलैरपि।

सार्धं तदनु तत्पात्रं साधारं न्यस्य मूर्धनि।

वस्त्रेणाच्छादितं छत्रचामरव्यजनान्वितम्। (पाद्मे)

मृत्संग्रहणविषयाः

अंकुरार्पणादि कार्याणि कर्तव्य मण्डपस्य उत्तमादि भेदाः

चतुरश्रं समं वापि प्राक्पश्चिम दिगायतम्।

सौम्य याम्यायतं वापि कर्तुमिच्छानु रूपतः।

तथा प्रागाननं यद्वा यथाभिमत दिङ्मुखम्।

द्वात्रिंशतिधनुर्मानं मण्टपंचोत्तमं भवेत्।

अष्टादश धनुर्मानं मण्टपम्मध्यमं भवेत्।

अधमं द्वादश धनुर्मानं स्यादथवा द्विजः। (ई)

मृत्संग्रहण,अंकुरार्पणादिकार्य स्थलविशेषाणि

श्रीगृहे मण्टपे बिल्वे तुळसी यत्र तत्र च।

विष्णुक्षेत्रे तथा दिव्ये मृत्संग्रहण माचरेत्।

केवले वा शुचौदेशे मृदंशुद्धं समाहरेत्।

अंकुरार्पणस्याऽपि शुभनक्षत्र तिथि विशेषः

नक्षत्रे शोभने पूज्य पूजकालानुगुणे तिथौ।

वारयोगादिके मुख्ये प्रारभेदंकुरार्पणम्।

कारकस्यानुकूल्येन शुभग्रह निरीक्षिते।

शुभऋक्षे शुभतिथौ रिक्ता तिथि त्रयं विना।

स्वस्तिवाचन पूर्वं तु सुगुप्तेस्थापयेत्क्रमात्। (सनत्कुमारं)

<u>अन्यत्र</u>

संक्रान्त्यांकथने सोम सूर्यग्रहणे तथा।

शुभनक्षत्र योगे च नाम ऋक्षेऽथवा मुने।

अंकुरार्पण कार्यं तु कारयेत्सर्व कर्मणि। (कपिञ्जलं)

मृत्संग्रहणस्य दिङ्निर्णय विधिः,फलानिच

उदीच्यां प्राप्यते शांतिः प्राचींवापि दिशं व्रजेत्।

इत्थं मृत्ग्रहणे शस्तं सुखायैव नृणां भवेत्।

यदिगच्छेद्दिशश्चाऽन्यां सर्व दुःखाय वै भवेत्। (परमं)

मृत्संग्रहण काले परिभ्रमण देवताः

विष्वक्सेनं तु वा ताक्ष्यं हनुमत्प्रमुकं तु वा।

हेतीशं वापि वस्त्राद्यैरलंकृत्य विशेषतः। (ई)

मृत्संग्रहणस्य क्षेत्र निर्णयं

ग्रामस्य वास्तुभागस्य गत्वा देशे मनोरमे।

नदी तीरेषु तीर्थेषु देवतायतनेषु च।

पर्वतेषु प्रशस्तेषु आरामेषु तथैव च।

गोवालैर्मजयेत् क्षेत्रं शुqद्ध कृत्वा विचक्षणः।

तत्र मृत्संग्रहणं कार्यं देव्या चैव तु शासनात्। (श्रीधरीये)

मेदिनी देव्याः मुखादीनां लेखनीय विधिः

मेदिनीं ऊर्ध्व वक्रान्तां ईशान्ये न्यस्त मौलिकाम्।

नैऋ तिन्यस्तपादान्तां नवतालं लिखेत्सुधीः।विष्णुतत्वे)

खनित्रस्य लक्षणमाह

खनित्रस्य लक्षणं वक्ष्ये द्वादशाङ्गुल दीर्घकम्।

प्रादेशेनैव विस्तीर्णं घणमेकाङ्गुलं भवेत्।

पुच्छं षडङ्गुलं प्रोक्तं अग्रे दण्ड समन्वितम्।

तत् दण्डं च धनुर्मानं मूले रन्द्रसमन्वितम्। (वासिष्टे)

मृत्संग्रहण कालभेदेन शिरोदिग्भेदाः

मध्याह्ने प्राक्शिरो भूत्वा सायाह्ने दक्षिणो शिरः।

अर्धरात्रे तु वारुण्यां उषक् प्रत्यक् शिरो भवेत्। (वि-तत्वे)

मृत्संग्रहणमन्त्रः,हरणस्थानानि च

मेदिनीं मन्त्रमुच्छार्य मेदिनीं मुखदेशतः।

तद्बाह्वोः स्तनयोर्मध्ये जठरे तु मृदं हरेत्।

स्थानभेदेन फलभेदाश्च

मुखे च सर्वतोह्यविघ्नं बाह्वोः बहु सुवर्णतः।

स्तनयोः कुलवृद्धिस्यात् जठरे सर्व संपदः।

भवत्यन्ते तु व्यत्यासे सर्वं नाशयते ध्रुवम्।

उदङ्मुखो खनित्रेण प्राङ्मुखोवाऽथ देशिकः।

कालमात्रं व्यपोह्यैव मृदमाहृत्य वै तथा। (विहगेन्द्रे)

अंकुरार्पण विषयाः

<u>अंकुरार्पणे पालिकादीनां स्थान निर्णयः</u>

पालिका दक्षिणे स्थाप्या मध्यमे घटिकास्तथा।

उत्तरेषु शरावाश्च पालिकाद्या यथा क्रमम्। (श्रीः)

<u>अन्यत्र</u>

आग्नेये दक्षिणे भागे नैऋतेपि च पालिकाः।

घटिका वारुणे ब्राह्मे तथा पौरन्दरेपि च।

शरावामारुते सौम्ये ईशाने च यथा विधिः। (ई- पारमेच)

अंकुरार्पणे पालिकादीनां उत्तमादि विषयः

अष्टोत्तरशतं चैव उत्तमं परिकीर्तितम्।

तदर्धं मध्यमं प्रोक्तं तदर्धमधमं भवेत्।

षोडशं द्वादशं वापि अष्टकं वा समाचरेत्। (अनिरुद्धं)

अंकुरार्पणे पालिकादीनां लोहविषये

सौवर्णीं पालिकां कुर्यात् राजतीं घटिकाकृतिम्।

ताम्रमेव शरावं स्यात् सर्वं ताम्रमयं तु वा। (सात्वते)

उत्सवदिनभेदेन अंकुरार्पणे धान्य भेदाः

अंकुरं त्रिविधं प्रोक्तं बीज प्ररोह तण्डुलम्।

बहुवारेतु बीजंस्यात् अल्पवारे प्ररोहकम्।

सद्यःकाले विशेषेण तण्डुलं सं प्रचक्ष्यते। (अनिरुद्धं)

पुष्पांकुरविषये(श्रीः-37 अ)

यद्वा तत्कालजैःपुष्पैः सात्विकैः सुमनोहरैः।

स्थापयेत्पालिकादींश्च क्षाळयेन्मन्त्रपूर्वकम्।

सुगन्धिचन्दनैस्तेषां बिंबमूलानि पूरयेत्।

बिलानिपूरयेत् तेषां निशाचूर्णाक्षतैस्ततः।

सोमकुम्भं च तद्वोमं वर्जयेदत्र कर्मणि।

प्रोक्ष्य पुण्याहतोयेन कुम्भमण्डल पालिकाः।

अष्टोत्तर शत पालिकास्थापन कालाः

महोत्सवे धवजारोहेह्युत्सवाऽवसरे यथा।

पात्राणां पालिकादीनां अष्टोत्तर शतम् मतम्। (पारमे)

पालिकादीनां लक्षणमाह

पालिकाः घटिकाश्चैव शरावास्तत्र पूर्वतः।

सौवर्णाः राजसस्ताम्रा मृण्मयावाऽपि ब्राह्मणाः।

पालिका मुखविस्तारं षोडशाङ्गुलमुच्यते।

तस्यांकण्ठञ्चपादञ्च कुर्यादष्टाङ्गुलं तथा।

शरावाणां मुखंकुर्याद् द्वादशाङ्गुल विस्तृतम्।

चतुर्दिक्स्थित वक्राणां विस्तृतं चतुरङ्गुलम्।

घटिकाःपञ्चवक्राः स्युर्मध्ये षडङ्गुलं तथा।

सर्वेषां पादपीठानि विस्तृतानि दशाङ्गुलम्।

चतुरङ्गुलमौन्नत्यमङ्गुलं कण्ठमुच्यते। (पाद्मोद्भवं)

पालिकादीनां अधिदेवतानां निर्णयः

घटिकाणां विधातारं पालिकानां जनार्दनम्।

ईशानं च शरावाणोध्यात्वामभ्यर्च्य यथा विधि। (पाद्मे)

<u>अन्यत्र</u>

संकर्षणांशजं विष्णुं पालिकासु यजेद्रमे।

अनिरुद्धांश संभूतं ब्रह्माणं घटिकासु च।

प्रद्युम्नांशजं शर्वं शरावेषु सरोद्भवे। (श्रीः)

अन्यत्र

अञ्जनाभं परं चैव पद्मनाभं ध्रुवं तथा।

पात्र स्कन्धत्रिके विप्राः क्रमेण परिपूजयेत्। (ईश्वरे)

अन्यत्र

पालिका वैष्णवी ज्ञेया ब्राह्मी तु घटिका स्मृता।

शरावं शैवमित्युक्तं प्रत्येकं द्वादशाहरेत्। (पाद्मोद्भवं)

उत्तमोत्तम पालिकानां स्थापने षड्विंशद्देवताःनामानि

प्रत्येकं पालिकादीनां षड्वि शत्परिकल्पने।

चतुष्टयं तु मूर्तीनां स्वप्नाख्य पद संस्थितम्।

प्रभवाप्यय योगेन जाग्रद्रूपम् तथाऽष्टकम्।

मूर्त्यन्तर द्वादशकंतच्छक्तीनां चतुस्त्रयम्। (ई- पारमेच)

उत्तमोत्तम शरावाणां स्थापने षड्विंशद्देवताःनामानि

अनन्ताद्यंच षड्वि शत् पाताळ शयनान्तिमम्।

उत्तमोत्तम घटिकानां स्थापने षड्विंशद्देवतानां नामानि

स्वधादीनांच शक्तीनां चतुस्त्रिंशश्च तत्परम्।

चक्रशंखौक्रमाद्भोगैरर्घ्यगन्धादिभिर्यजेत्। (ई- पारमेच)

पालिकानांषोडश स्थापने अधि देवताः

सर्वार्थ पालिकानांच षोडशेषु क्रमाद्रमे।

वासुदेवादि चतुरो दशद्वौ केशवादयः। (श्रीः)

द्वादश, अष्ट, चतुः पालिकादीनां अधि देवतानां विषये

केशवादीन् द्वादशसु विष्ण्वादीनष्टके यजेत्।

जनार्दनादींश्चतुर्षु क्रमेणाऽऽवाह्य पूजयेत्। (श्रीः)

पालिकादीनां अलंकरण विषये

दूर्वाऽश्वत्थ पत्रं च सुशीतं बिल्व पत्रकम्।

तासाम्मूलेतु बध्नीयात् श्वेत सूत्रेण वेष्टयेत्।

ङ्गङ्गइन्द्रन्नत्वेति ङ्ग'मन्त्रेण तन्तु वेष्टनमाचरेत्। (विहगेन्द्रे)

<u>अन्यत्र</u>

प्रक्षाळ्य शुद्ध तोयेन बिलं संपूरयेत्तृणैः।

रजनी पत्र दूर्वैश्च बन्धयेत्कण्ठ देशतः। (अनिरुद्धं)

<u>अन्यत्र</u>

नीवारादिषु धान्येषु केशवादीन् समर्चयेत्। (श्रीः)

बीजावापनकाले वेदमन्त्राः

बीजानि निर्वपेत्तेषु संसृज्य विधिवत्ततः।

"या जात"इति मन्त्रेण तेषु बीजानि विन्यसेत्।

गन्धपुष्पादि दीपं च पयोभिः क्षाळयेद्बुदः।

ङ्गङ्गजितन्तङ्कङ्कइति मन्त्रेण सिञ्चेद् हरिद्रवारिणा।

सह शङ्खानि नादैश्च मद्दळैः सह मङ्गलैः। (मार्कण्डेयं)

अंकुराभिवृध्यर्थं कर्म-(श्रीः-पाद्मे च)

कालयोःपूजनं कुर्यात् हरिद्राजलसेचनम्।

अंकुराणां वर्णभेदेन फलभेदाः

अंकुरान् श्यामळान् रक्तान् कृष्णान् तिर्यग्गतानपि।

अप्ररूढांस्त्यजेन्मन्त्री यथा पूर्वं पुनःसृजेत्।

शान्ति होमं च कुर्वीत तद्दोषस्य प्रशान्तये।

नित्ये नैमित्तिके सृष्टिः काम्ये त्याज्यो न संशयः।

श्यामेषु द्रव्य नाशं स्यात् रक्तेषु कलहो भवेत्।

कृष्णेषु मानसी पीडा रोगस्तिर्यग्गतेषु चेत्।

अप्ररूढेषु मरणं भवेदत्र न संशयः।

शुभं पीतेषु शुक्लेषु ऋजुषूर्ध्व गतेषुच।

सर्व संपत्समृद्धिश्च कर्तुःकारयितुर्भवेत्। (श्रीः, ईश्वरे)

पालिकादीनां उद्वास विषये(श्रीः)

पालिकासु स्थितान् देवांश्चक्राब्जे तु विचिंतयेत्।

उत्सवाऽनन्तरं पालिकादीनां विसर्जन विषये

ततो यागालयं देवमानीयाभिप्रदर्शयेत्।

चतुस्थानार्चनं वेदसमाप्तिं कारयेद्गुरुः।

पालिकासु स्थितान् देवान् चक्राब्जे तु नियोजयेत्।

सांकुरंपात्रमानीय प्रार्थयेद्धरिमव्ययम्।...।

मङ्गलांकुर पूजांत्वं गृहाण कमलापते।

इति विज्ञाप्य तदनु श्रीसूक्तेनाऽर्चयेद्विभुम्। (श्रीः)

उत्सवाऽनन्तरं भगवतःसमर्पित अंकुराणां शिरसा धारिते फलमाह

भगवत्समर्पितान् दिव्यान् पालिकाद्यंकुरान् शुभान्।

धृत्वातु शिरसा लोकेदूतपाप्मोनरो भवेत्। (परमपुरुषं)

रक्षाबन्धन विषयाः

रक्षा सूत्रभेदेन फलभेदाः

एक सूत्रं महापापं द्विसूत्रं दैत्य नाशनम्।

त्रिसूत्रंतु विनाशश्च पञ्च सूत्रं महाबलम्।

चतुर्थं आभिचारं च वर्जयित्वा विचक्षणः।

षड्सूत्रंतु समृद्धिश्च सप्त सूत्रं सुखावहम्।

अष्टमो आयुरारोग्यं नवमंतु विनाशनम्।

द्वादशं कार्य सिद्धिश्च एवं सूत्रस्य लक्षणम्। (चित्रशिखण्डि)

<u>अन्यत्र</u>

तदूर्ध्वं हेमजंसूत्रं क्षौमंकार्पासमेववा।

पट्टजं पञ्चभिस्सूत्रं चतुर्भिः सप्तभिस्तुवा। (ई)

रक्षाबन्धनस्य अवश्यकत्वम्

उत्सवेषुप्रवर्तेषु दृष्टिदोष प्रशान्तये।

आशौच परिहारार्थं योग्यतापतनायच। (वासिष्टे)

सूत्राणां अधिदेवता विषये

श्रीवत्साच्छ्रियमावाह्य रक्षासूत्रेषु पूजयेत्।

अपराजित मन्त्रेण रक्षासूत्राणि वै स्पृशन्।

सौदर्शिन्या च गायत्र्या सप्तवारं जपेत्सुधीः। (श्रीः)

श्रियःआवाहन मन्त्र निरुक्तिः

ततः परमधामाचाऽवस्थिते मदनुग्रहा।

अभियोगोद्यते चेह तथैवा वतारे तिच।

इहाभिमत शब्दं च सिद्धिदे इति च क्रमात्।

ततो मन्त्र शरीरे च तारास्तार नमो नमः।

पंचचत्वारिंशद्वर्णो मन्त्र आवाहनार्थकः। (लक्ष्मी तंत्रे)

एतन्मन्त्रस्य विवरणमाह

"ओं ओं ह्रीं ह्रीं परम धामावस्थिते मदनुग्रहाभियोगोद्यते इहावतारे (इ)हाभिमत सिद्धिदे मन्त्र शरीरे ओं ह्रीं नमो नमः।'' (इति४५ अक्षराणि)

मूर्ति भेदेन क्षौमादि सूत्र भेदाः

प्रथमं देवदेवस्य मूलमूर्तिगतस्य च।

बन्धयेन्कौतुकं सूत्रैः हेमजैः पट्टजैस्तु वा।

हेमजं सूत्रमादाय गन्धेनालिप्य बन्धयेत्।

देवस्य दक्षिणे हस्ते यात्रामूर्तिगतस्य च।

जितन्ताख्येन मन्त्रेण शंख गीतादि संयुतम्।

स्पृष्ट्वा दक्षिण हस्तेन सूत्रमस्त्रशतं जपेत्।

श्रियो वामकरे कुर्यात्पट्ट सूत्रेणकौतुकम्।

श्रीसूक्त मुच्छरन्वाऽपि तन्मन्त्रेणद्विजोत्तमाः।

पुष्ट्यास्तु वामहस्ते तु क्षौम सूत्रेण बन्धयेत्।

कुर्यात्स्नपन बिम्बस्य पट्ट सूत्रेण कौतुकम्।

बलि बिम्बादिकानांच कृत्वैवं कौतुकं ततः।

कौतुकं देशिकेन्द्रस्तु कार्पासेन स्व दक्षिणे।

करेतु मूल मन्त्रेण बन्धयेत्तु ततः परम्।

तथैव कर्म कर्तृणां कौतुकं बन्धयेत् क्रमात्।

विभवे सति सर्वेषां सूत्रं हेममयं भवेत्। (ईश्वरे)

<u>अन्यत्र</u>

"भगवन् पुण्डरीकाक्ष शरणागत वत्सल।

रक्षासूत्रं गृहाणत्वं मखाराधन पूर्तये।"

इति संप्रार्थ्य वै सूत्रं पात्रादादाय देशिकः।

अङुष्टानामिकाभ्यां च गृहीत्वा हस्तयोद्वयोः।

ङ्गङ्गविश्वेत्तातेति.ङ्कङ्कमन्त्रेण मूलभेरस्य दक्षिणे।

हस्ते बद्ध्वा जपेन्मन्त्रमस्त्रंतु दश संख्यया।

एवं कर्मादि बिम्बानां रक्षासूत्रंतु बन्धयेत्। (श्रीः)

एककुण्ड विधान उत्सवे रक्षाबन्धन विषयः

एककुण्ड विधानंचेदुत्सवादिषु पद्मजे।

आचार्य मात्रं बध्नीयात् कौतुकं ऋत्विजां विना। (श्रीः)

आलयेषु यजमानःब्राह्मण इतर विषये रक्षाबन्धन विषयः

अब्राह्मणो भवेद्यत्र यजमानस्तु भूतले।

रक्षा सूत्रंतु तत्स्थाने घण्टायां बन्धयेत्पुरा।

तदन्वेकंतु लौक्यंच यजमानस्तु बन्धयेत्।

दीक्षा वस्त्रादिकान्सर्वं तथैवस्यान्मुनीश्वराः।(परमपुरुषं)

रक्षा बन्धन विना उत्सवाः

रक्षा सूत्रं विना कुर्यादेकघस्त्रोत्सवादिकम्।

भक्त बिम्बाद्युत्स्वं च सद्यः संप्रोक्षणं तथा।(श्रीः)

रक्षाबन्धनकृत आचार्ययेव प्रधानत्वं

एकं कर्म समुद्दिश्य रक्षा बन्धं कृतं यदि।

तेनैव सर्व कर्माणि कुर्याद्देशिक सत्तमः।(श्रीः, ईश्वर, पारमे)

रक्षाबन्धनकृत आचार्यस्य आशौचाऽभावः

रक्षामङ्गल सूत्रं यो बध्नन् वर्तेत देशिकः।

शवाशौचं सूतकं च तस्य नास्ति जलोद्भवे।

स्नानमात्रम् भवत्येव किंचिद्भेदस्तथात्रिजाम्।(श्रीः)

रक्षाबन्धनादनंतर कृत्याणि

देवम घ्र्यादिनाऽभ्यर्च्य अपूपादीन्निवेदयेत्।

ताम्बूलादीन्समभ्यर्च्य ताम्बूलैस्तोषयेद्विजान्।

दीक्षितान् वैष्णवांश्चापि देशिकेन्द्र पुरस्सरम्।(ई)

रक्षाबन्धन निषेद् अर्चकाः

माता पित्रोर्दीक्षितश्च विधुरो मलिनीपतिः।

श्राद्ध्र कर्ताच पत्न्यांतु गर्भिण्यामपि दीक्षितः।

कंकणंतु न बध्नीयात् तथाऽऽचार विगर्हितः। (श्रीः)

वास्तुशांति विषयाः

वास्तु पूजन अवश्यकथा समयाणि

कर्षणादिषु कार्येषु प्रतिष्ठां च विशेषतः।

उत्सवारम्भ पूर्वे तु वीथिषु मरणे सति।

वास्तु शान्तिं तु कर्तव्यं प्रोक्षयेत् पंचगव्यकम्।

सर्षपं च विकीर्णं स्यात् पुण्याहं प्रोक्षणं चरेत्।

आदौ वास्तु शान्तिं स्यात् पश्चात् कर्म समारभेत्। (वासिष्टे)

<u>अन्यत्र</u>

उत्सवे च प्रतिष्ठायां प्रायश्चित्तेषु सर्वशः।

वास्तु होमं प्रकुर्वीत कर्मशेषं समारभेत्।

अनर्चिते वास्तु नाथे कृतं कर्माऽऽसुरं भवेत्। (पाद्मे)

वास्तु पुरुषस्य लक्षणमाह

वास्त्वीशक्षेत्र नाथौ द्वौ स्थितौ दक्षेतर क्रमात्।

शुक्लवक्रः कृष्ण देहो द्विभुजो रत्न पात्र धृक्।

दक्षिणेन करेणैव सर्वामर समाश्रयः। (पारमे)

अन्यत्र

पुण्डरीक समानाभ वस्त्र स्त्रगनुलेपनः।

गदोद्यत करो विप्र! ध्यातव्यो वास्तु पूरुषः। (ई)

अन्यत्र

तस्या ईशान कोणे तु प्रतीच्यां मस्तके रमे।

अधोमुखं पाणियुग्मं पादौचापि प्रसारितम्।

प्रसारित तले पूर्वं विलिखेद्वास्तु दैवतम्। (श्रीः,पाद्मे)

अन्यत्र

वास्तु देवं चतुर्वक्रं भार्गवस्वेद सम्भवम्।

पूर्वे क्रोडमुखं,सिम्हं,सौम्यं,अश्वं दिशां क्रमात्।

नवताल प्रमाणेन तिलेन विलिखेद्गुरुः।

हलं च दक्षिणे हस्ते वामे च मुसलायुधम्।

धारयन्तं विभुं नीलं किरीट मकुटान्वितम्।

रक्त केशम् महाप्राणं दीर्घ दंष्ट्रंमहाबुजम्।

वहन् सर्वमलंकारं विग्रहं वास्तु पूरुषम्। (विष्णु तत्वे)

मासभेदेन वास्तु पुरुषस्य शिरो दिग्भेदाः

ऐन्द्रे शिरः प्रोष्टपदादि मासः

याम्ये मार्गशीर्षादि त्रये च।

पाल्गुण्य मासे शिरःपश्चिमं स्यात्

ज्येष्टादिमासे शिरःउत्तरे च। (ज्योतिषार्णवे)

वास्तु नाथस्य अङ्ग देवताः

वास्तु देवस्य शिरसि पूजयेदंशुमालिनम्।

झषध्वजं बाहु मूले कुमारम् कूर्परे तथा।

हस्ते विनायकंचैव पादौ अश्विनि देवताः।

मध्ये चंद्रं तथापाश्वे दुर्गा इतरंच कूर्परे।

बाहु मूले तथा स्थाणुं हृदयेमामवस्थितः।

ब्रह्माणं नाभि देशेच दिक्पालान् स्वासु दिक्षुच।

क्षेत्रेशं उत्तरे पाश्वे वास्तु नाथं तु पूजयेत्। (पाद्मे)

क्षेत्र पालस्य लक्षणे

क्षेत्र पालं महाकायं नील जीमूत सन्निभम्। (पाद्मे)

<u>अन्यत्र</u>

नील जीमूत संकाशं दण्ड हस्तं महा तनुम्।

मुष्टिकृद्धाम हस्तेन याग क्षेत्रस्यपालकम्। (पारमे)

वास्तु पूजायां मण्डलार्चन विशेषः

वास्तु मण्टप मध्यस्थ पदमारभ्य बाह्यतः।

इन्द्राद्यष्टपदे ब्रह्मन् विरिञ्चादीन् समर्चयेत्।

१"ब्रह्मजिज्ञानमिति" जप्त्वा मन्त्र गुरुः स्वयम्।

*प्रजाप ति, विधातारं, ब्रह्माणं, कमलासनम्।

अजं, विधिं, शतानन्दं, द्रुहिणं, विश्वरेतसम्।

आवाहयामीत्युच्छार्य परमेष्टिन मर्चयेत्।

२ तत्पूर्व पद षड्के तु महेन्द्रं पूजयेत् क्रमात्।

"त्रातारमिति" मन्त्रेण पूजयेद्देशिकोत्तमः।

महेन्द्रं,देवतानाथं,शचीनाथं,पुलोमजम्।

स्वर्गादीशं, वज्रहस्तं पद षड्के समर्चयेत्।

३.तद्वास्तुपद षड्के तु धर्मराजं समर्चयेत्।

"यमायसोममित्येत"न्मन्त्रराजं समुच्छरन्।

यमं, दण्डधरं, कालं,कालांशं, रविनन्दनम्।

धर्माधिनाथमित्येतैः पद षड्के समर्चयेत्।

४.तत्पश्चात्पद षड्के तु अर्चयेदंभसां पतिम्।

"इमम्मेवरुण"इत्येतद्वुधो मन्त्र समुच्छरन्।

वरुणं, मकरारूढं,पाशपाणिं, प्रचेतसम्।

सुरूपिणं, अपांनाथं,प्रादक्षिण्येन पूजयेत्।

५.ततस्सम्पूजयेत्सोम माप्यायस्वेति"मन्त्रतः।

यक्षराजं, कुबेरं च,गुह्य केशं, धनाधिपम्।

गदाधरं,यातुधानं,पदषड्के समर्चयेत्।

६, ''अ ग्निंदूतं"समुच्छार्य आग्नेयमग्नि मर्चयेत्।

हुताशनं धूम्रकेतुं,सप्तजिह्वं, हविर्भुजम्।

मध्ये पद चतुष्कस्य संपूज्यैवं हुताशनम्।

७."घोषणं''मन्त्रमुच्चार्य तद्वत्पद चतुष्टये।

खड्गहस्तं,कर्बुरं च,निऋ ति, नरवाहनम्।

पूजयेत् पूर्ववद् ब्रह्मन् तदनु द्विज सत्तम।

८.''आवातवाहि''''मन्त्रेण वायुं पद चतुष्टये।

पवमानं च, मरुतं,जगत्प्राणं, समीरिणम्।

क्रमेणाऽऽवाह्य विधिवत् पूजयेत् कमलासन।

९.''तमीशानं''''तथोच्छार्य तद्भागस्य चतुष्टये।

पदभूमिषु चेशानं,गौरीशं च,महेश्वरम्।

पूजयेद्विधिना ब्रह्मन् पश्चाद् वृषभवाहनम्। (श्रीमन्नारायणे)

वास्तुपुरुषस्य मन्त्रमाह

ओं नमोभगवतेस्थान संरक्षणाय वास्तुपुरुषाय नमः(स्वाहा)। **(कपिञ्जले)**

वास्तु होमविषये

वास्तुनाथस्य मन्त्रेणजुहुयाद्देशिक सत्तमः।

सोममन्त्रेणचाऽऽज्यंच शतमष्टोत्तरं यजेत्।

मण्डलान्तरस्तु देवानां तत्तत्पदस्तु संख्यया।

समिच्चरु घृतं होमं कुर्याद्वास्तोश्च तृप्तये।

शम्यपामार्ग खदिर समिद्भिर्होम माचरेत्।

परिवारान् ततोहुत्वा सर्वदेवान् यथाक्रमम्।

समिद्भिश्चरुणाऽऽज्येन पूर्णाहुति मथाचरेत्। (श्रीमन्नारायणे)

ध्वजपट विषयाः

ध्वजपट विषये उत्तमादि भेदाः

उत्तमं नव हस्तं च सप्तहस्तं तु मध्यमम्।

अधमं पंच हस्तं च त्रिविधः पट उच्यते। (ईश्वर, पारमेश्वरे)

अन्यत्र

ध्वजार्थं पटमाहत्य निर्दोषं तु नवं शुभम्।

अथ द्वारसमंवाऽपि यजमानसमं तथा।

त्रितालं वा द्वितालं वा पटं तत्र प्रचक्षते। (पाद्मोद्भवं)

ध्वजपटे एक मूर्ति पंचमूर्ति चतुर्मूर्तीनां विलेखन विषये

ध्वजं तु गरुडाकारं एकमूर्तिस्तु सत्तमाः।

सत्यस्सुपर्णो गरुडःतार्क्ष्यश्च चतुरात्मनः।

पंचमूर्तेस्तु चत्वारोविहगेश्वर संयुतः। (ईश्वर, पारमेश्वरे)

गरुडस्य आयुध विषये भेदाः

गरुडवाहन परशुधारण चक्र पाशधरम्।

स्पटिक सन्निभ मकर कुण्डल कनक मकुटधरम्। (गरुडगद्यम्)

अन्यत्र

गरुडं गमनोद्युक्तं हेमाङ्गं कुटिलेक्षणम्।

नीलनासाग्र संयुक्तम् सर्वावयव सुन्दरम्।

बद्धाञ्जलिपुटं सौम्यं शंख चक्रधरं विभुम्। (श्रीः)

अन्यत्र

पटमध्ये तु गरुडं द्विभुजं विधृताञ्जलिम्।

पुष्पाञ्जलि पुटंवाऽथ सुवर्णाचल सन्निभम्। (ई, पारमे)

गरुडस्य उपरि आयुधानां लेखनविषये

परितःशंख चक्रं च गदा खड्गौ तथा धनुः। (श्रीः)

अन्यत्र

पञ्च वर्णैर्लिखेदेवं देवं पंचायुधं तथा।

चक्रं खड्गं शरं चैव शङ्खं शार्ङ्गं गदां क्रमात्।

पटोर्ध्वे ह्युभयोःपार्श्वे विलिखेच्च यथा विधि। (ई, पारमे)

गरुडस्य दशकुम्भ आवाहनविधिः

कुम्भे च करकेचैव आसनं परि कल्पयेत्।

कुम्भे गरुडमावाह्य करके मन्त्रमस्त्रपम्।

पूजयित्वाऽर्घ्यगन्धाद्यैः ततो दिक्कलशाष्टके।

इन्द्रादि लोकपालांस्तु प्रादक्षिण्येन पूज्य च। (ई, पारमे)

गरुडप्रतिष्ठा काले मण्डल विषयमाह

कुण्डमाग्नेयके कुर्यात् मण्डलं पट पूर्वतः।

मण्डलं स्वस्तिकं वापि भूतावासमथापि वा। (अनिरुद्धं)

तत्कुम्भ विसर्जन विषये

महाकुम्भस्थ गरुडं पटस्थे तु निवेशयेत्।

उपकुम्भाष्टकेनापि अष्टनागान् यथाक्रमम्।

आयुधानां तथैवोक्तं करकास्त्र जलेन तु।

एवं क्रमेण संप्रोक्ष्य ततो देशिक सत्तमः। (ईश्वरे)

ध्वज स्तम्भस्य वृक्षाणां विषये

ध्वजस्तम्भं प्रवक्ष्यामि श्रुणुष्व कमलासन।

सुवर्णं राजतं ताम्रं पंचलोहादि दारुजम्।

चंदनस्तम्भकंचैव बिल्वमार्जुनमेव च।

अर्जुनं खादिरंवापि साल तिन्दुकमेव च।

चम्पकश्चाऽष्टकं चैव ध्वजस्तम्भं प्रकल्पयेत्। (पाद्मे)

ध्वज स्तम्भस्य स्थान निर्देशाः

गोपुरस्थानयोर्मध्ये ध्वज पीठं प्रकल्पयेत्।

अथवा बलिपीठस्य वैनतेयस्य वा पुनः।

हस्त मात्रं परित्यज्य बलि पीठस्यवाऽन्तरे। (विष्वक्सेने)

<u>अन्यत्र</u>

देवगेहं प्रविश्याऽथ बलिपीठाग्रतो मुने।

ध्वजस्तम्भःखनेद् भूमौ निर्दोषं सारयुक् तथा। (पाद्मोद्भवं)

<u>अन्यत्र</u>

पश्चाद्वा पुरतोवापि त्रितीयावरणे कृतम्।

द्वितीयावरणेवापि प्रथमावरणेपिवा।

देवस्याभिमुखं वृत्तं चतुरश्रमथापिवा।

स्तम्भंतु स्थापयित्वा तु सर्वलक्षणमन्वितम्। (नारदीये)

<u>अन्यत्र</u>

एवं कृत्वा ध्वजस्तम्भं बलि पीठस्य वै रमे।

पश्चाद्वा पुरतोवापि स्तम्भार्थं स्थापयेत् भुवम्। (श्रीः)

वृक्षविशेषाः

अन्तस्सारोबहिस्सार निस्सारस्त्रिविधः क्रमात्। (पाद्मं)

वैणवं नालिकेरंवा क्रमुकं तालमेव वा। (नारदीये)

तेषां लक्षणमाह

चम्पको देव दारुश्च चन्दनः खादिरस्तथा।

सालवृक्षश्च बिल्वाश्च ककुबालको यथा।

इत्येवमादयो वृक्षाः अन्तस्सारा उदाहृदाः।

क्रमुको नालिकेरश्च हिन्तालस्तालकस्तथा।

विष्णुश्चापि बहिस्सारः प्रशस्ताः ध्वज कर्मभिः।

किंशुकाद्यस्तु ये विप्र निस्सारः समुदाहृदः।

निस्सारं वर्जयेत्स्तम्भं सर्वदा ध्वज कर्मणि। (ई, पारमे)

<u>अन्यत्र</u>

ध्वजदण्डं प्रतिष्ठाप्य स्तम्भं चन्दनकं तथा।

तेकवृक्षं च खादिरं पनसं पाटलं तु वा।

क्रमुकं नाळिकेरं च तालं वेणुं तथैव च। (अनिरुद्धे)

वृक्षस्य लक्षणे

आद्रं नवं ऋजुं स्निग्धं वक्र स्फोटविवर्जितम्।

अयुग्म पर्वकं शुद्धं सत्वचं सुस्थिरं द्विज।

ग्राहयित्वा ध्वज स्तम्भं शास्त्र दृष्टेणवत्र्मना। (ई, पारमे)

तेषां मानानां भेदाः

शततालाऽर्धमर्धंच मुख्य मध्यमाऽधमं क्रमात्।

प्रासादेन समुच्छ्रायं सुषिरादि विवर्जितम्।

त्रिंशदङ्गुल नाहंतु मूल दण्डस्य नारद।

मध्यमं चाष्टविंशच्च तदर्धषड्विंशकं भवेत्। (विष्वक्सेनं)

स्तंभस्य प्रतिष्टा विषये

देशिकः तार्क्ष्य मन्त्रेण ततो ब्राह्मण सत्तमैः।

शूद्रैर्वा दीक्षितोभिर्वा देवदासीरथापिवा।

शंख भेर्यादि निर्घोष गीत वादित्र संयुतम्।

स्थापयेत्तु ध्वजस्तम्भं तस्मिन् गर्ते ऋजुस्थितम्। (ईश्वरे,श्रीः)

ध्वजस्तम्भस्य देवतानां विषये

प्रातःकाले च मध्याह्ने ध्वजारोहणमुच्यते।

अनिरुद्धं ध्वजस्तम्भे हृदयादवतार्य च।

गुणे मायां समावाह्य नैवेद्यांतं च कारयेत्।

"वैराजेन तु साम्ना""वै ध्वजं संयोजयेद्रमे। (श्रीः)

<u>अन्यत्र</u>

पुण्याहंवाचये त्तत्र ध्यायेत् स्तम्भस्थ देवताः।

स्तम्भमूले महाविष्णुः मध्ये ब्रह्माणमेव च।

अग्रे च स्थापयेद्रुद्रं पूजयेत्सर्व देवताः।

'सुपर्णोसीति"" मन्त्रेण ध्वजस्यारोहणं भवेत्। (पाद्मोद्भवं)

अन्यत्र

दण्डं प्रजापतिं विद्यात् दण्डाग्रे तार्क्ष्यमेव च।

यन्त्राधारे त्रयं चैव चन्द्राऽऽदित्याऽनलाद्युतिः।

वलयं वासुखिं चैव रज्जु नाळं तथैव च।

एताश्च देवताःचैव ध्वज दण्डं समर्चयेत्। (वासिष्टे)

ध्वजस्तम्भस्थापने फलमाह

ध्वजस्तंभ प्रतिष्ठासु सर्व संपत्करं भवेत्।

हरेः सायुज्य प्राप्तिश्च संभवेत्तेन भूतले। (परमपुरुषं)

भेरीताटनस्य कारणमाह

आह्वानार्थंच देवानां गमनार्थञ्च रक्षसां।

भेरीं तु ताडयेद् ब्रह्मन् उत्सवे देशिकःशुचिः। (पाद्मोद्भवं)

अन्यत्र

देवतावाहनीं गाधां संस्कृतं प्राकृतं तु वा।

द्रामिडीं वा यथेच्छातस्तदा संश्रावयेद्विभुम्।

तत्काले देवतानृत्तं तत्तद्गीतादि संयुतम्।

दर्शयेद्देव देवस्य देवतानां सुतृप्तये। (पारमे)

भेर्यादीनांस्थान निर्देशः

देवस्य पुरतो भूमौ धान्य पीठं प्रकल्पयेत्।

काल चक्रं तत्रलिख्य न्यसेद्दीपान् समन्ततः।

मड्डुकं ब्राह्मणस्थाने पाश्वयोस्तस्य वै रमे।

शंखं कोणंच विन्यस्य तदादीन् परितो न्यसेत्।

ऐन्द्रे वीणादि यांयेतु सुषिरादीनि पद्मजे।

वारुण्यां चर्म वाद्यानि सौम्ये कांस्यंतु विन्यसेत्।

पिधाय नव वस्त्रेण प्रोक्षयेत् पुण्य वारिणा। (श्रीः)

भेर्यादीनां आवाह्न देवताः विषये

संकर्षणं मड्डुकेच शंखेविष्णुंच कोणके।

वायोरप्यधिपमावाह्य फलादीनि निवेदयेत्।

सुषिरप्यनिरुद्धंच वीणादिषु मधु द्विषम्।

नरोत्तमं चर्मभुजेतु कांसजेषु अधोक्षजम्।

एवमावाह्यचाभ्यर्च्य नीराजन मथाचरेत्। (श्रीः)

वाद्यस्य लक्षणमाह

चतुर्विंशाङ्गुलायामं विस्तारं द्वादशाङ्गुलम्।

पीठं षडङ्गुलं ज्ञेयम्मध्ये पद्मं सकर्णिकाः।

चर्म बन्धं काम्स्यंच नादं सुषिरमेवच।

गानं पञ्च विधं प्रोक्तं पञ्चरात्रे प्रकीर्तिताः। (सनकं)

पञ्च महावाद्यानि

घण्टा भेरी मृदङ्गंच शंखे काहलमेव च।

कुर्यात्पञ्च महाशब्दं देवस्याग्रे विशेषतः। (विष्णु)

<u>अन्यत्र</u>

भेरी मध्ये ततो विष्णुं पूजयेद्विष्णुमन्त्रतः।

ब्रह्माणं दक्षिणेऽभ्यर्च्य रुद्रमभ्यर्च्य वामके।

कोणं तद्दक्षिणे स्थाप्य वायुं तत्रैव पूजयेत्। (ईश्वरे)

दश ग्रह गणानां नामानि

संचरन्ति दशविधाःग्रहगणाः उक्त्वादशविधा महीं।

देवा देव्याश्च पितरः राक्षसा नाग नायकाः।

गन्धर्व यक्षाः पिशाचाः सिद्धाश्चापि धरागणाः।

एते दशविधा ब्रह्मन् दशदिक्षु स्थिताः सदा। (पारमे)

दशतालानां नामानि

समतालस्तथा बद्धास्तालो वै भृङ्गिणी तथा।

मल्ल तालो मङ्गलश्च जयतालस्तु भद्रकः।

ढक्करी संज्ञितास्तालो ब्रह्मतालस्तथैवच।

अनन्ततालइत्येते दशतालाः प्रकीर्तिताः। (सनकं, पारमे)

दश स्वराणि

षड्ऋषभो गान्धारं मध्यमः पंचमस्तथा।

दैवतश्चेन निषादो दैवतो मध्यमस्तथा।

पंचमश्च क्रमेणैव कथितास्युर्दश स्वराः। (ई)

दश रागाणि

गन्धाररागो कौळश्च कौशिको नट्टभाषिकः।

श्री कामदश्च तक्केशी दक्षरागस्तथैवच।

चोलापाण्यभिदौ रागौ मेगरागश्च पश्चिमः।

इत्येते कुमुदादीनां दशरागः प्रकीर्तिताः। (पारमे,ईश्वरे)

अन्यत्र

कान्तारं पूर्वदिग्भागे कौशिकं दक्षिणेतथा।

पश्चिमे कामदं प्रोक्तं तर्करागं तथोत्तरे।

आग्नेयांकौळिक्यां नैऋते नटभाषणम्।

तक्केशी वायुदिग्भागे चोलपाणीतु शाङ्गरे। अनिरुद्धे)

दश नृत्तानि

विलासं सर्वतोभद्रं खेटकं चक्र मण्डलम्।

कान्तार कुट्टिमं पृष्टकुट्टिमं कटि बन्धनम्।

वामजानूर्ध्व नृत्तंच आदिमंच द्वयं पुनः। (पारमे)

अन्यत्र

मध्यमे पञ्चमं प्रोक्तं पीठस्थानेतु मालती।

ऐन्द्रेतु देशी नृत्तं स्यादाग्नेये मल्लकं भवेत्।

दक्षिणेतु घट क्रीडा युद्धक्रीडाच नैऋते।

पश्चिमे कन्दुक क्रीडा गणक्रीडाच मारुते।

मार्गमुत्तरतो विद्याद्भुजङ्गश्चैशके परम्। अनिरुद्धे)

गरुडस्य, विष्वक्सेनस्य ताल नृत्त विशेषाः

अन्येषांसर्व देवानां तालो भद्रः प्रशस्यते।

भवेद्गरुड ताळस्तु पक्षीशस्यतु मध्यमः।

स्वरो रागस्तु गौडःस्यान् नृत्तंवै विष्णुक्रान्तिकम्।

विघ्नेशोर्जय तालंस्यात् नृत्तं स्वस्तिकमुच्यते।

ऋषभस्तु स्वरःप्रोक्तः वराटी राग एव च।(जयोत्तरे,पारमे)

भेरीं प्रथमं गुरोरेव ताडन विषये

गुरुर्मड्डुकमासाद्यत्रिगाथामुच्चरन् रमे।

(१)वेदाः सर्वे विवर्धन्तां देवाःसर्वे सवेधसः।

वर्धन्तां वैष्णवाः सर्वे वर्धन्तां ब्राह्मणोत्तमाः।

एवं त्रिवारमुच्चार्य मड्डुकं ताडयेद्गुरुः।

(२)भुजवीर्यजितारति वन्द्यमान पदद्वयः।

वर्धन्तां भूपतिर्नित्यंसामात्यःसपुरोहितः।

इमं श्लोकं त्रिरुच्चार्य मड्डुकं ताडयेत्ततः।

(३)वाणिज्येन च संप्राप्त महाधन विवर्धनाः।

वर्धन्तामूरुजाः सर्वे धान्य रत्न समेधिताः।

इत्येवं त्रिःपठन् धीमांस्ताडयेन्मड्डुकं गुरुः।

(४)लक्ष्मीशोत्सव सेवार्थं आगताः मुख बाहुजाः।

ऊरू पाद समुद्भूताःसर्वे धातारः सत्यवादिनः।

इतरे मानवाः सर्वे पुत्र पौत्र धनाधिपाः।

शतायुषश्च वर्धन्तां नीरोगाः निरुपद्रवाः।

वर्णानां क्षेममुद्दिश्य मड्डुकं ताडयेत् पुनः।(श्रीः)

प्रथमादि ताडनविषये मन्त्र निरुक्तिः

तद्विष्णोरिति मन्त्रेण प्रथमं ताडनं भवेत्।

ब्रह्मजिज्ञान मन्त्रेण द्वितीयं ताडनं स्मृतम्।

कद्रुद्रायेति मन्त्रेण तृतीयं ताडनं भवेत्। (ईश्वरे)

भेरिताडन भेदेन हस्त भेदाः

प्रथमं वामहस्तेन त्रिधा सन्ताडनं चरेत्।

दक्षिणेन ततः संयक् तथा सन्ताडयेत्तथा। (ईश्वरे)

भेरिताडन काले वाद्य विशेषाः

प्रथमं शंखनादं तु द्वितीयं काहळस्वनम्।

द्वितीयं ताडनं प्रोक्तं क्रमेण एवं हि कारयेत्।

देवताह्वान वेळायां सर्व वाद्यानि घोषयेत्। (ईश्वरे)

मानुषादि आलये स्वयं व्यक्तादिआलये भेरि ताडन भेदाः

स्वयंव्यक्तादि बिम्बानामुत्सवे समुपस्थिते।

आह्वानं देव पुरतो वीथीषुच बलिं क्षिपेत्।

मानुषादिप्रतिष्ठानां बिम्बानामुत्सवे रमे।

आह्वानं बलिदानंच वीथ्यामेव तु कल्पयेत्। (श्रीः)

एकाहादि उत्सवादीनां अधिदेवता निर्णयः

भवेत् प्रथमरात्रंतु वासुदेवाधि दैवतम्।

संकर्षणो देवतां विद्धि द्वितीयंतु त्रितीयकम्।

प्रद्युम्नदैवतंचान्यदनिरुद्धं तथैवच।

भवेत् पंचमरात्रं तु तं नारायणं तथा।

वराह दैवतं रात्रं नवमं द्विज सत्तम।

द्वादशाहोत्सवं विप्र केशवाद्यधि दैवतम्।

सर्वं पंचदशाहानि वासुदेवाधि दैवतम्।

सप्ताहं वासुदेवादि सप्तमूर्त्यधिदैवतम्। (सनत्कुमारे,पारमे)

उत्सवेषु बलिदान अवश्यकत्वं

भेरीताडनपूर्वस्तु देवतावाहनं चरेत्।

बलिदानञ्च भूतानां रात्रौदद्यात् भयापहम्।

भूतेभ्यश्च बलिंदद्यात् पायसं पललं तथा। (पाद्मोद्भवं)

बलिदानस्य लक्षणमाह

दर्भासनंततः कृत्वा देवमुद्दिश्य साधकः।

आवाहयेत्ततो देवं इन्द्रंकुमुदमेव च।

अघ्र्यंपाद्यं तथाचामं गन्धंपुष्पंच धूपकम्।

बलिंतांबूलकंचैव श्लोक पूर्वं तथा यजेत्। (अनिरुद्धं)

दिन भेदेन बलिद्रव्यस्य भेदाः

फललं रजनी चूर्णैः सलाज दधि सक्तुकम्।

दिनेष्वपिच सर्वेषु द्रव्यैरपि बलिं ददेत्।

यद्वा द्वितीय रात्रौतु दध्याश्च तिल तण्डुलैः।

दध्यात् त्रितीय रात्रौतु दानास्त्वंबिक लाजकैः।

दद्यात् चतुर्थ रात्रेतु बलिं देशिक सत्तम।

नाळिकेरपयः सक्तु शालि पिष्टैर्विमिश्रितैः।

पंचमे तु बलिंपंच बीजैःसहाऽक्षतैः।

षष्ट रात्रे बलिंदद्यात् अपूपैः चरुणा सह।

अथवा सर्वरात्रेषु प्रदद्यात् चरुणा सह।

सप्तमेतु गुळान्नेन पायसान्नेनचाऽष्टमम्.

नवमं कृसरान्नेन बलिंदद्यात् विचक्षणः। (पारमे)

<u>अन्यत्र</u>

सप्तमादिषु सर्वत्रसार्धमन्नैश्चतुर्विधः।

अपूपांश्च तथा सक्तून् प्रत्यहं निक्षिपेद्बलिम्।

ब्रह्मादि ईशान पर्यन्तं स्थानेष्वष्टसु पूर्ववत्। (पाद्मे)

बलिदानस्य संख्या निर्णयमाह

द्वाविंशद्बलिर्युक्तो द्वादशाहे महोत्सवे।

तथैव षोडशबलिः नवाहोस्तु महोत्सवे।

सप्ताहे द्वादश बलिः पञ्चाहेऽष्टबलिः स्मृतः।

एकाहो द्विबलिर्वापि तथाएकबलिरेववा। (नारदीये)

बलिदानकाले अन्नमूर्तेः लक्षणमाह

पूर्णेन्दु बिम्ब मध्यस्ते सितपद्मे विकस्वरे।

आसीनं देवताकारं नीलकुञ्चित मूर्धजम्।

दुकूल क्षौम वसनं बालयोग विभूषितम्।

कलदौतमयं पात्रं पायसान्नेन पूरितम्।

बिभ्राणं दक्षिणे हस्ते दध्योदन मथेतरे। (पाद्मे)

अनुक्तव्यदेवतानां बलि विषये

अनुक्तानांच सर्वेषां ग्राम मध्ये मुनीश्वराः।

नमःपारिषदेभ्योश्चेत्युक्त्वा शिष्ट बलिं क्षिपेत्। (ईश्वरे)

एतेषां बलिदानेन फलं

भवेतु बलि निक्षेपं बलिमुद्रां च दर्शयेत्।

पदे पदे तेतु फलं लभन्ते नाऽत्र सम्शयः। (सात्वतामृते)

अन्यत्र

बलीनामप्यलाभेतु क्रिया भवति निष्फला। (सनत्कुमारे)

बलिदान निषेद देशाः

अशून्येषुच वीथीषु प्रतिलोमैः स्थितेषुच।

न दद्यात् बलिदानंतुह्यालयेष्वेव कारयेत्।

ग्रामादिषु वीथीषु रमे तुलुष्क प्रतिलोमजाः।

तिष्ठन्तिचेत्तदा देवी प्राकारेषु बलिं क्षिपेत्। (श्रीः)

उत्सवेषु ग्रहण संभवे बलिदान विशेषः

आरम्भदिवसे रात्रौ समाप्तिदिवसेऽहनि।

बलिमेकां क्षिपेन्मध्य दिवसेषु बलिद्वयम्।

अह्नि रात्रौच सर्वत्र बलिदानं यथाविधि।

अवसानदिने रात्रौ ग्रहणे विषुवे दिने।

प्राप्ते कुर्यादवभृतं यदि तस्मिन् बलि द्वयम्। (पाद्मे)

अन्यत्र

परस्ताच्च पुरस्ताच्च ग्रहणे सोम सूर्ययोः।

द्विनाडिकां परित्यज्य नित्यपूजां समाचरेत्।

महोत्सवाद्युत्सवेषु द्विनाडिकां परित्यजेत्।

नित्यपूजाऽवसानेतु विशेषोत्सवमाचरेत्। (श्रीः)

भेरि ताडनात्परं ग्रामवासिनां अन्यक्षेत्र

गमनागमने प्रायश्चित्त विधिः

भेरि ताडन शब्दाख्यंतथा श्रुण्वन्तियो जनाः।

तद्देशोत्तं नगच्छेयुः यावत्तीर्थ दिनान्तिमं।

मोहेन यदि गच्छेयुस्ते ते भविष्यति रोगिणः।

न कुर्युस्ते नदीतरणं नयानं योजनात्परम्।

यातुश्चेत् पुनरागत्य गरुडं संप्रपूज्यच।

तीर्थ यात्रां तु संसेव्यते भविष्यन्ति नीरजः। (विष्वक्सेने)

ध्वजारोहण, भेरीताटनादीनां दर्शनफलविषये

ध्वजारोहणवेळायां खगेशं यस्तुदृश्यते।

तस्यसन्मङ्गलं भूयात् सर्वदाच न संशयः।

देवताह्वान कालेतु भेरींयस्तु श्रुणोति सः।

अवाप्यात्रतु सर्वेष्टान् अन्ते वैकुण्ठमाप्नुयात्। (परमपुरुषं)

यागशाला विधेर्विशेषः चतुर्दिक्षु वेदिकानांस्थापन फलं

यागोपकरणार्थंच हस्तद्वय समायतम्।

वेदीं प्रकल्पयेद्धीमान् वह्निकोणेऽथ नैऋते।

यागबिम्ब स्थापनाय वायव्ये मण्डलायच।

ईशानकोणे पालिकादि स्थापनाय कल्पयेच्चताम्। (श्रीः)

महोत्सवे यागशालायां महाकुम्भादीनां देवतानां विषये

पूर्वाद्याशागते कुम्भे वासुदेवादिकान् यजेत्।

आग्नेयादिषु कोणेषु यष्टव्याः पुरुषादयः। (पाद्मे)

हवनविधौ परिवार होमविषये

पञ्चमे परमान्नेन ब्रह्मादीन् च पृथक् पृथक्।

तत्तन्नाम्ना चतुर्थ्यन्तं परिवार पदान्वितम्।

स्वाहान्तं मन्त्रमुच्चार्य ध्यात्वा ब्रह्मादि दैवतम्।

ब्रह्मा प्रजापती रुद्रस्सर्वे देवा यथाक्रमम्।

छंदाम्सि वेदा ऋषयो गन्धर्वाश्च सरिस्रपाः।

यक्षाश्चाऽप्सरसश्चैव मासाद्यैः सह वत्सरः।

सरितश्च समुद्रश्च पर्वताश्च तथापगः।

भूतानि पशवोवृक्षस्तथैवौवषदयस्मृताः।

वनस्पतिश्चोद्भिदश्चाण्डज स्तथा।

जरायुजश्च भूरादि सप्तलोकास्तथैवच।

अतलाद्यास्तथा लोकास्सप्त चण्डादि देवताः।

इत्येतेभ्यो हविद्रव्यं जुहुयान्मूल विद्यया। (पाद्मे)

उत्सवेषु वाहनादीनां क्रममाह

प्रथमो शिभिकायानं द्वितीयो शेषपीठिकाम्।

त्रितीये चन्द्र बिम्बंचदिवाचेत् सूर्य मण्डलम्।

चतुर्थेदिवसे पुष्प मण्टप वाहनम्।

पंचमेदिवसे प्राप्ते गरुडरोहणं भवेत्।

षष्टेदिनेतु संप्राप्ते तन्निशायां दिवाऽपिवा।

बल्यन्तमर्चनं कृत्वा देवमास्थान मण्टपे।

भद्रासने समारोप्य परस्तस्य शोधिते।

अष्टमेऽहनि तद्रात्रौ डोलारोहन पूर्वकम्।

अश्वारोहं ततःकुर्यात् मृगयां चापि कारयेत्।

नवमेऽवभृतं कुर्यात्तद्रात्रौ शिभिकोत्सवम्।

वाहणारोहणस्येवं क्रमःसम्यङ्निरूप्यते। (ई)

<u>अन्यत्र</u>

प्रथमेऽहनि देवस्य हंसवाहनमिष्यते।

द्वितीयदिवसे सिम्हं त्रितीये विहगेश्वरम्।

चतुर्थेऽहनिशेषं पंचमे अङ्गनी सुतम्।

षष्टेतु सूर्य चन्द्रौ च रथारोहं तु सप्तमे।

अष्टमे तु तुरगंस्यात् नवमे गजमेव च। (पुरुषोत्तमम्)

<u>अन्यत्र</u>

उत्सवे देवदेवस्य वाहनानि श्रुणुष्व मे।

विमानो भास्करो शेषः सिम्हो गरुडएवच।

गजोरथो हयश्चेति द्रुमः कल्पक संज्ञिकः।

हंसः चन्द्रः सुमेरुश्च शिभिका भद्रपीठिकाः।

एवंविधानि दिव्यानि वाहनानि मनस्विनी।

स्वर्णादि रत्न विकृते दारुभिर्वाऽपि शिल्पिभिः।

कारयित्वा तेषु ताक्ष्यं प्रतिष्ठाप्य गुरूत्तमः। (श्रीः)

अन्यत्र

रथंवा कुञ्जरंवाऽपि शिभिकांवा स्वलंकृतम्।

एषामलाभे प्रियंवा संपूज्य गरुडात्मनः।

तत्रोत्सवार्चामारोप्य मखादीन् पूर्तिमाचरेत्। (नारदीये)

अन्यत्र

प्रथमे स्यन्दनं प्रोक्तं द्वितीये शिभिका भवेत्।

तृतीये गरुडं प्रोक्तं चतुर्थे रथमेवच।

पञ्चमान्दोळिका यानं षष्टेवै कुञ्जरं तथा।

सप्तमे पुष्प यागं स्यात् अष्टमेचाश्ववाहनम्।

नवमे कुञ्जर प्रभा दशमो कुञ्जरं भवेत्। अनिरुद्धं)

वाहनादीनां समर्पणे फलमाह

वाहनादिक निर्माणे देवस्य मधुविद्विषः।

शतयज्ञ फलप्राप्तिः निश्चयं मुनिसत्तमाः। (परमपुरुषं)

स्पर्शदोषाऽनर्ह द्रव्याः

सकळं निष्कळंचैव द्विविधं परिकीर्तितम्।

सकळं बिम्बमित्युक्तं निकळं पादुकास्तथा।

रथं विमानं पीठंच वाहनं पादुकां तथा।

निष्कळस्य विशेषेण स्पर्श दोषो नविद्यते। (संकर्षणे)

अन्यत्र

प्रथमेऽहनि कल्याणं वनविहारमनंतरम्।

ध्रुवोत्सवंतृतीयेह्नि चतुर्थे डोलिकोत्सवम्।

पञ्चमं पूरणंप्रोक्तं जलद्रोणींतु षष्टकम्।

सप्तमे रथयात्रांच विशेषोत्सवमाचरेत्।

अष्टमे मृगयात्राच नवमेऽवभृतं स्मृतम्। (विश्वामित्रं)

वीथिभ्रमणकाले समर्पणीय द्रव्याणि

यात्रायां वर्तमानायां देवदेवस्य भक्तितः।

मुखवासं सतांबूलं बहुशोऽथ निवेदयेत्।

चन्दनं श्रमशान्त्यर्थं कर्पूराद्यैः सुवासितम्।

प्रदद्याद्देवदेवाय माल्यानि विविधानिच।

शीतळं तर्पणजलं नारिकेळ जलान्वितम्।

श्रमशान्ति निमित्तानि अन्यान्यपि निवेदयेत्। (पारमे)

महोत्सव दर्शने फलमाह

महोत्सवप्रवर्तेतु भगवद्दर्शनंभुवि।

असमान फलप्राप्ति हेतुभूतमितीरितम्।

गरुडारूडविष्णोस्तु सेवा मोक्षफलप्रदा। (परमपुरुषं)

वीथिभ्रमणादनन्तरं घटदीप दर्शनस्य कारणमाह

नयेद्वीथिषु देवेशं शनैश्चतसृषु क्रमात्।

महापीठस्य पुरतो मूलार्चाभिमुखम् हरिम्।

स्थापयित्वा दृष्टि दोषान् परिहर्तुं गुरूत्तमः।...।

पाकशालाऽग्निनादीप्य वाद्य घोषपुरस्सरम्।

देवस्य पुरतःपीठे स्थापयेद् घट दीपिकाम्...।

देवस्य दक्षिणं पादमारभ्येतर पश्चिमम्।

भ्रामयेत्सर्वतोङ्गानि द्विवारं वा त्रिवारकम्।

नेत्रमन्त्रं जपन्नेव ततः पीठे निवेशयेत्। (श्रीः)

घटदीपस्य देवताः विषये

दीपिकामस्त्र मन्त्रेण सम्प्रोक्ष्य गुरुसत्तमः।

जलेतु वरुणम् ध्यात्वा ज्वालायां जातवेदसम्।

आवाह्य गन्धपुष्पाद्यै र घ्र्याद्यैरभि पूजयेत्। (श्रीः)

कल्याणोत्सव विषये

यस्याऽवतार दिवसे तत्र कल्याणमाचरेत्।

अवतारेषु सर्वेषु अनुक्ते जन्मतारके।

एकादश्यां प्रकुर्वीत कल्याणं भक्ति भावतः।

जगत्कल्याण सिद्ध्यर्थं प्रत्यब्दं कारयेत्तथा। (सनकं)

नीराजन विषये (अन्नपिण्डपरिभ्रमणे -द्राविडदेशायामपि वर्तते)

(तामसनीराजनं इति पारमेश्वरे-15 अ)

नीराजनं तामसाख्यमिदानीमवधारय।

पाकस्थानं समासाद्य योषिद्वा परिचारकाः।

पात्रमेकं समादाय पूर्वोक्तद्रव्यनिर्मितम्।

अन्नपिण्डानिचत्वारि दूर्वामुष्टिचतुष्टयम्।

तस्मिन्पात्रे चतुर्दिक्षु विनिवेश्याथवा द्विज।

पृथक् चतुर्षु पात्रेषु तानि चत्वारि विन्यसेत्।

कल्याणोत्सवदर्शने फलमाह

कल्याणोत्सव वेळायां देवेशं यस्तु पश्यति।

तस्यसर्वाणि पापानि नश्यन्त्येव न संशयः। (परमपुरुषं)

षष्टमे दिवसे जलद्रोणि उत्सवेन सह चूर्णोत्सव विषयः

षष्टे दिनेतु संप्राप्ते तन्निशायां दिवापि वा।

बल्यन्तमर्चनं कृत्वादेवमास्थान मण्टपे।

भद्रासने समारोप्य पुरतस्तस्य शोधिते।

भूतले धान्यपीठेतु चूर्णकुम्भं च विन्यसेत्।

प्रोक्ष्य पुण्याह तोयेन श्रियं तत्र समर्चयेत्।

श्रीसूक्तमुच्चरन् देवं चूर्णैः समभिषेचयेत्।

विष्टरेतु जलद्रोणीं सौवर्णींवाऽथ राजतीम्।

निवेश्यतां समापूर्य गालितेन जलेनतु।

सूक्तेन पौरुषेणैव विभोःकृत्वावगाहनम्।

याने देवं समारोप्य सह स्नानाद्र वाससा।

कुङ्कुमेन समालिप्य आपादान्मस्तकावधि।

भ्रामयेत्प्राङ्गणं वीधिं प्रीतये वरुणस्य च। (ईश्वरं,पाद्मं)

तत्काले दर्शन भक्तस्य फल विषये

तत्काले देवदेवेशं भक्त्यापश्यन्ति ये द्विजाः।

ते सर्वेधूत पाप्मानो भवन्ति निरुपद्रवाः। (ई)

सप्तमेदिवसे चूर्णाभिषेक विधिः

सप्तमे दिवसेदेवि प्रातर्नास्त्युत्सवंहरेः।

बलिदानं नकुर्वीत चतुस्थानंतु पूजयेत्।

एकाशीति घटैः स्नाप्य विधिवत्कमलोद्भवे।

सप्तवा पञ्चवा कुम्भानेकंवा शुद्धयेत्ततः।

चूर्णं संपूर्णितं कुम्भं देवस्य पुरतो रमे।

धान्यपीठे विनिक्षिप्य शोधयेच्छोषणादिभिः।

चूर्णं श्रीसूक्तमुच्चार्य मूलार्चामभिषेचयेत्।

ततः श्रीपुष्टि सहितं कर्मार्चां स्नापयेद्रमे।

चूर्णाभिषेकमित्थंच कृत्वा देशिक सत्तमः। (श्रीः)

तच्चूर्ण धारणस्य फलमाह (नारदीयं)

भुक्तावशिष्टं यच्चूर्णं भक्तानां मू र्ध्नि धापयेत्।

गङ्गा स्नान फलं प्राप्तिः सर्वपाप प्रणाशनम्।

क्रीडयावापि तच्चूर्णं शिरसा धारयेत्तु यः।

तस्य देह गतं पापं तत्क्षणादेव नश्यति। (ई, श्रीः,पारमे)

अन्यत्र

वासुदेवस्तनुस्पृष्टं चूर्णं परम पावनम्।

पादस्पृष्ट जलं विप्र गङ्गा तोय समं भवेत्।

तुळसी चन्दनंपुष्पं सर्व पापहरं नृणाम्।

तस्मात्सर्व प्रयत्नेन भक्तानांच प्रदापयेत्।

ये वहन्ति पिबन्नित्यं तेच यान्ति परांगतिम्। (अनिरुद्धे)

रथादेः बृहत्वे यानान्तरेण परिभ्रमण

पूर्वकं रथादिके समारोप पूर्वं भ्रामणम्

ग्रामे वा नगरे वापि पत्तने वा महामते।

बृहती स्यन्दने याने यानेनाऽन्येनवान्तरा।

भ्रामयित्वा तु तत्पश्चाद्बृहती स्यन्दनादिके।

देवेशं तु समारोप्य भ्रामयेद्ग्राम वीधिषु। (पारमे)

रथारोहे देवदर्शने फलमाह

रथस्यतुदेवस्य दर्शनं यः करोति सः।

जन्मराहित्यममलं प्राप्नोति सुविनिश्चयः। (परमपुरुषं)

अवभृतकाले चूर्णाभिषेक विषयः

ध्वजपीठस्य पुरतःक्षितौ गोमयवारिणा।

आलिप्ते चतुरश्रे च शालिभारैर्विकीर्य च।

वस्त्रपूर्वाद्यलंकृत्य उलूखल मलंकृतम्।

अवहन्यान्निशाचूर्णं निक्षिप्तं तदुलूखले।

गायन्त्यो गणिकागाथां मङ्गलं देवदासिकाः।

अवहन्युर्निशाचूर्णं यथा सूक्ष्मतरं भवेत्।

निक्षिप्त चूर्णं तदनु कुम्भं वेष्टित वाससम्।

सकूर्चं मल्लकं पीठे तण्डुलैः परिकल्पयेत्।

स्थापितं मूलमन्त्रेण गन्धादिभिरथाऽर्चयेत्।

आदाय कुम्भचूर्णैस्तैः श्रीसूक्तेनाऽभिषेचयेत्।

ऋत्विजोदेशिकेन्द्रश्च देवं गत्वाप्रदक्षिणम्।

आरोप्य देवं हस्त्यादौ तीर्थ बिम्बमलङ्कृतम्।

पश्चादुत्सव बिम्बेन नीयमानेन पूर्ववत्।

सहितं सरितस्तीर्थं नीत्वा यद्वासरित्तटम्। (पाद्मं)

अवभृतकाले देवेनसह निमज्जने फलमाह

सरिदादौ च तीर्थेषु तीर्थान्यावाह्य नामतः।

निमज्जयेत्तत्र बिम्बं चक्र मन्त्रैर्यथा विधि।

तीर्थमौत्सव बिम्बे समानीते तु वारिभिः।

प्रोक्ष्यकूर्चाग्र प्रपतितैर्बिम्बं चक्रं निमज्जयेत्।

चक्राभावेतुतत्कूर्चं केवलं देव सन्निधौ।

देवेन सह तत्काले निमज्जन्तिच ये जनाः।

ते निर्धूयशुभं सर्वं महापातकमप्यथ।

यान्तिध्रुवं सदुष्पापं स्थानमाचन्द्रतारकम्। (पाद्मं)

अन्यत्र

ये स्नापयन्ति संप्राप्य गङ्गास्नान फलं लभेत्।

सर्व दानफलैश्चैव सर्व तीर्थफलं लभेत्। (अनिरुद्धं)

अन्यत्र

तीर्थोत्सवेतु यो भक्त्या चक्रेण सहमज्जते।

सहस्त्रग्रहणस्नान समंसत्फलमाप्नुयात्। (परमपुरुषं)

अन्यत्र

तच्चतीर्थजलंपानात् सर्व पाप प्रणाशनम्। (सनत्कुमारं)

अन्यत्र

तीर्थोत्सव प्रवर्तेतु चक्रस्नानोदकं पिबेत्।

सर्वाऽघशमनं नृणां सर्वसंपत्प्रदायकम्। (परमपुरुषं)

अन्यत्र

तीर्थबिम्बं समादाय शिरसा धारयन्गुरुः।

जलमध्यं संप्रविश्य नाभिदघ्नजले स्थितः।

निमज्जयेत्तीर्थ बिम्बेन त्रिवारं मूर्तिपैः सह।

देवेन सह तत्काले निमज्जन्तिच ये जनाः।

विमुक्त कल्मषाः सर्वे प्राप्नुयुःपरमां गतिम्। (श्रीः)

तीर्थबिम्बमलाभे कर्तव्य विधिः

अभावे तीर्थबिम्बस्य स्नान बिम्बेन तत्क्रियाम्।

बल्यर्चा तद्विहीने पादुकाभ्यां वा चरेत् गुरुः। (श्रीः)

दूरस्थबन्धूनुद्धिश्य स्नानेपि तेषामपि तत्फल सिद्धिः

साधकाभ्यर्थितः स्नायात् सर्वानुग्रहया धिया।

विद्वान् योऽनेन विधिना तीर्थमासाद्य तत्ववित्।

स्नापयेद्वान्धवादीनां प्राप्नुवन्त्यचिराच्चते।

तैर्थं फलमनायासान्मन्त्रमूर्तेः प्रसादतः। (पारमे)

अवभृतादनन्तरं कटाहे निमज्जन विषयः

जलद्रोण्यादिके पात्रे गन्धतोयैः सु पूरिते।

मुहूर्तेमज्जयेद्देवं अ घ्र्याद्यैः संप्रपूज्यच।

*एतद्विषयस्य विवरणमाह । आचार्य शरीरगत जलबिन्दु पात प्रायश्चित्तार्थं जलद्रोणी निमज्जनं देवस्य इति व्यवह्रियते। (पारमेश्वर व्याख्याने)

पुष्पयाग विषये

(पुष्पयागस्य शब्द निरुक्तिः)

देवेश यजनंयत्तु मण्डले पुष्पपूरिते।

पुष्पयाग इतिप्रोक्ता उत्सवान्तेतु कारयेत्। (विष्वक्सेनं)

पुष्पयागं कर्तव्य अवश्यकत्व

ध्वजारोहण तीर्थान्तं यत्किंचित् स्खलनं कृतम्।

अस्पृष्टस्पर्शनं जातं दृष्टिभेदोऽथवा मुने।

नैवेद्ये यज्ञकार्येच स्नपनेचाङ्गुरार्पणे।

संभूतानांच दोषाणां जानतावाप्यजानता।

तत्तद्दोषप्रशान्त्यर्थं तस्य निष्कृति सिद्धये।

प्रायश्चित्तंतु कर्तव्यं पुष्पयागेन कर्मणा। (पाद्मोद्भवं)

(पुष्पयाग कर्तव्य कालभेदेन फलभेदाः)

पुष्पयागं ततःकुर्यात् पुष्ट्यर्थं मध्यमे दिने।

आप्यायनार्थी पूर्वाह्णे धर्मार्थी मध्यमे निशि।

रिपुक्षयार्थी मध्याह्णे सन्ध्यायां सर्व शान्तिदम्। (श्रीः)

अन्यत्र

निशायां सर्वशान्त्यर्थं पुष्ट्यर्थं मध्यमेदिने।

आप्यायनार्थी पूर्वाह्णे धर्मार्थी मध्यमे निशि।

तथा रिपुक्षयार्थी च पुष्पयागं समाचरेत्। (ई,पारमे)

उपयोगपुष्पाणां लक्षणे

पञ्चवर्णानि पुष्पाणि पुष्पयागे शुभानिच।

श्वेतं रक्तंच नीलंच कृष्णं हरितमेवच।

शुद्ध वर्णानि एतानि मिश्रितान्यपराणिच। (विष्वक्सेनं)

अन्यत्र

यद्वा तत्कालजैःपुष्पैः सात्विकैःसुमनोहरैः।

तुळसी पल्लवैः श्यामैःकृष्णैः चक्राब्ज मण्डलम्।

कल्पयित्वा उक्तमार्गेण मण्डलस्य बहिर्गुरुम्। (श्रीः)

अन्यत्र

कल्हार पङ्कज पलाश सुगन्धिजाति-

बिल्वादि पाटलमशोक सुचम्पकानि।

अन्यानि सौरभविशिष्ट विचित्रितानि

अष्टाधिविंशद्दशकानि कुसुमानितानि। (विहगेन्द्रं)

तेषुमण्डलेषु आवाहन विषये

श्रियंप्रसूनमावाह्य तेषुपुष्पाणि वापयेत्।

द्वादशाब्जपत्रेषु कर्णिकायां तथैवच।

चक्राब्जकर्णिका मध्ये प्रणवाधिपमव्ययम्।

प्रागादि दळमूलेषु द्वादशार्णानि पूजयेत्।

दळमध्येषु कूर्चेषु केशवादीन् विचिन्तयेत्।

दळाग्रेष्वर्चयेन्मन्त्री प्रणवं स्फटिकप्रभम्। (श्रीः)

विवरणमाह

ओं ओं ओं केशव स्वरूपिणे सित वर्णाय

ओं नमो भगवते वासुदेवाय आगच्छ।

इत्यादीनां द्वादशवर्णैःसहआवाह्य। (क्रिया सागरे)

द्वादश आराधने उपचार विषये

प्रसून पात्रेचावाह्य बिम्ब नाभौ गुरूत्तमः।

अर्घ्यं पाद्यं तथाचामं ब्रह्मसूत्रं च चन्दनम्।

माल्यं धूपं दीपिकांच फलं नीराजनं तथा।

एलाकर्पूर सम्मिश्र तांबूलंच निवेदयेत्।

(पुष्प अभिषेचन काले)

ततो मण्डलपुष्पाणि समादाय गुरुः स्वयम्।

सूक्तेन पौरुषेणैवह्यभिषिञ्चेज्जनार्दनम्।

कुम्भतोयेन संप्रोक्ष्य नीराजन मथाचरेत्। (श्रीः)

<u>अन्यत्र</u>

प्रत्यक्षरं समस्तानि पुष्पैरभ्यर्चयेद्धरिम्।

हृदयादीनिचाङ्गानि समुद्दिश्याञ्जलि स्थितैः।

फलंभवतुमे पुष्पैर्नम इत्यवसानकम्।

तं तं मन्त्रं समुच्चार्य मन्त्रविद्देशिकोत्तमः।

तोषयेद्देव देवशं गेयैश्च बहुधा स्थितैः।

पुष्पाभिषेकं प्रहितैः पुष्पैरेव सितादिभिः। (पाद्मं)

पुष्पयाग समये दर्शने फलमाह

पुष्पयाग प्रवर्तेतु चक्राब्जस्थं जगत्पतिम्।

दर्शतेयस्तु सद्भक्त्या प्राप्नोति परमां गतिम्।

नामसंकीर्तनंचैव श्रवणंचधरातले।

सर्वपापहरं भूयात्सर्व विघ्न विनाशनम्। (परमपुरुषं)

ध्वजाऽवरोहण काले विशेष विधिः

ततस्तु देवदेवेशं यानमारोप्य कौतुकम्।

ध्वजस्तम्भं समासाद्य प्रकुर्वीताऽवरोहणम्।

प्रणम्य दण्डवद् भूमौ ध्वजंचैवावतारयेत्।

तत्पठंतु विसृज्याथ पूजयित्वा यथाविधि।

पायसादीन् चतुर्दिक्षु तन्मन्त्रेण निवेदयेत्।

ध्वजाग्रे स्थण्डिलं कृत्वा कुम्भं संस्थाप्यदेशिकः।

सूत्रवस्त्रादि संवेष्ट्य हेमं रत्नं विनिक्षिपेत्।

वैनतेयस्य मन्त्रेण ध्वजादावाह्य पक्षिणम्।

कुम्भमध्ये विनिवेश्य पूजयेत् गरुडध्वजम्।

शक्तिमुद्वास्य कुम्भेषु ध्वजयष्टिगतां तथा।

धामप्रदक्षिणम् कृत्वा खगेश गेहमानयेत्।

सुपर्णमभिषिच्याथ कुम्भोद्गतेन वारिणा। (पारमे,पाद्मोद्भवं)

<u>अन्यत्र</u>

ध्वजस्थानं समासाद्य ध्वजस्थं विहगेश्वरम्।

विसर्जयित्वा स्वहृदि ध्वजंसमवरोहयेत्। (ईश्वरं,श्रीः)

<u>अन्यत्र</u>

उद्वासन बलिं कृत्वा ध्वजंचैवाऽवरोहयेत्।

समभ्यर्च्य यथा पूर्वं मुद्वान्नं तु निवेदयेत्।

कुम्भे गरुडमावाह्य अवरोहणमाचरेत्। (अनिरुद्धं)

महाकुम्भादीनां उद्वासन विषये

महाकुम्भोपकुम्भांश्च यात्रोपकरणैः सह।

वेदघोषैर्वाद्यघोषैर्गच्छेयुर्देव मन्दिरम्।

देवस्य पुरतो धान्यपीठे कुम्भान् निवेशयेत्।

कर्मादिबिम्बान् स्वस्थाने विष्टरे स्थापयेद्रमे।

महोत्सवार्थं यथाशक्तिर्मूलभेराच्च कर्मणि।

कौतुके यज्ञ बल्योश्च बेरे कुम्भे विचिन्तिता।

कर पुष्पाञ्जलौ शक्तिं संप्रार्थ्य पुरतो रमे।

तत्पुष्पाणि हरेर्मूर्ध्निह्यर्पयेच्चान मास्थितः।

प्रोक्षयेत् कुम्भतोयेन देवं पुंसूक्तमुच्चरन्।

श्रीवत्से चिन्तयेद्देवी रक्षासूत्राणि मोचयेत्। (श्रीः)

<u>अन्यत्र</u>

कृत्वा विसर्जनं पश्चाद्देवमन्तःप्रवेशयेत्।

ततस्तु देवं देवीभ्यां मूलबिम्बस्य सन्मुखम्।

निवेश्यचोभयोर्मध्ये महाकुम्भंतु विन्यसेत्।

कुम्भप्रोक्षणपूर्वंतु कौतुकोत्सर्जनान्तिमम्।

प्राग्वत्कृत्वा यथाशास्त्रं देवमन्तः प्रवेशयेत्।

अर्घ्यगन्धादिनाऽभ्यर्च्य मूलबिम्बे विसर्जयेत्। (ईश्वरं)

तदनन्तरं अवभृतस्नान विषयः

ब्राह्मे मुहूर्ते सम्प्राप्ते देशिको मन्त्रवित्तमः।

उद्वासनबलिं दद्यान्मूकैः परिजनैः सह।

ग्रामेचाऽऽवाहितान् पूर्वं कुमुदादीन् गणान्वितान्।

सन्तोष्य बलिदानेन सविशेषं विसर्जयेत्।

महातटाके नद्यादौ देशिको मन्त्रवित्तमः।

ऋत्विजःपरिचारैश्च सर्वैः परिजनैः सह।

स्नानंकृत्वा तु विधिवद्गत्वा देव गृहं ततः। (ईश्वरं,पाद्मोद्भवम्)

आचार्य सम्मान विधिः

यजमानो गुरुं हेमैर्भूषणैः कटकादिभिः।

वसनैर्गन्ध पुष्पाद्यैरलंकृत्याभि पूज्यच।

उत्तमां दक्षिणां दद्यात् स्वर्णनिष्क शतान्तिमम्।

यागस्तु दक्षिणाहीने निष्पलस्यान्न संशयः।

तस्माद्वित्तानुसारेण दद्यादाचार्य दक्षिणा। (ईश्वरं,सनकं)

आचार्य उत्सव विधिः

तत्काले यजमानस्तु अलंकृत्य तु देशिकम्।

वस्त्रस्रक्चन्दनाद्यैश्च समारोप्यच यानके।

शंख काहळ वादित्र भेरी पटह संयुतम्।

छत्रदीप समायुक्तं गायकादिसमन्वितम्।

देशिकं देववत् स्मृत्वा स्वगृहे संप्रवेशयेत्। (ई, पारमे, श्रीः)

उत्सवकृते फलप्राप्तिः

महोत्सवः कृते येन सोऽश्वमेधफलं व्रजेत्।

यत्र देशे भवेद्येतदुत्सवः तत्र च द्विजाः।

सुवृष्टिस्सर्वतो भूयाद्राजा वृद्धिमवाप्नुयात्। (परमपुरुषं)

<u>अन्यत्र</u>

देवस्योत्सव कर्ता च आचार्यो ऋत्विजास्तथा।

परिचारक वर्गाश्च प्रेक्षकास्साधकास्तथा।

सायुज्यं प्राप्यमोदन्ते नित्यमुक्तायिवा द्विजाः। (पुरुषोत्तमं)

<u>अन्यत्र</u>

एवं हि देवदेवस्य उत्सवं कारयेत्तु यः।

इहलोके सुखंप्राप्य परलोकेमहीयते। (ईश्वरं)

<u>अन्यत्र</u>

शुभाशिषंततो लब्ध्वा सुखं सर्वं समाप्नुयात्।

एवं यःकारयेद्भक्त्या कर्मजो धनवान् नरः।

इहलोके सुखं प्राप्य परलोके महीयते।

राज्यश्रीमतुलां चैव भक्तिं प्राप्नोति नारद। (पाद्मोद्भवं)

<u>अन्यत्र</u>

उत्सवं देवदेवस्य यःकुर्यात्सफलं स्वयम्।

उत्तारयन् स्वयंविष्णोः सायुज्यं गच्छति ध्रुवम्।

हयमेधसहस्त्राणि यजते च समाहितः।

यश्चोत्सवेन यजते तयोस्तुल्य फलान्वयः।

यागानामपि सर्वेषां फलमुत्सव कर्मणि।

ग्रामेवा नगरेवापि पत्तनेवा महोत्सवे।

विष्णोःप्रवर्तते यत्र देशो राष्ट्रेऽपिवा भवेत्।

भयंन मृत्योर्न व्याधेर्न दुर्भिक्षादि सम्भवः।

नश्यन्ति तस्करास्तत्र नाऽधर्मस्सम्प्रवर्तते।

धर्मयुक्तो भवेद्राजा जनः धर्मपरायणाः।

भवन्ति सुखिनोस्सर्वे सर्व दुःख विवर्जिताः। (पाद्मं)

अन्यत्र

देवोत्सवादि कृपयानृपस्य बलायुरारोग्यकर श्रियश्च।

राष्ट्रस्य वृद्धि र्धनधान्ययुग्वे प्रयोजयित्रादि फलं सुखादि।

धन्यंयशस्यमायुष्यं सर्वपाप निकृन्तिमम्। (विष्वक्सेनं)

अन्यत्र

एवं यः कुरुते भक्त्या उत्सवं शास्त्रचोदितम्।

सोऽतुलां श्रियमाप्नोति कोटि धर्मफलं लभेत्।

अश्वमेध सहस्त्रंच वाजपेय शतं तथा।

सर्व तीर्थ फलंचैव बहुगोदानजं फलम्।

बहुधर्मफलंचैव लभते नात्रसंशयः।

सर्व पाप क्षयं यांति नात्र कार्य विचारणा।

द्विकाल स्नपनं कुर्यात् स्नान विद्धे विशेषतः। (अनिरुद्धं)

महोत्सवेषु सर्वेषु देशकालानु सारतः।

ऊहाऊह विधानेन करणीयं समर्चनम्।

नित्योत्सवादि विविधोत्सवाणां प्रमाणानि

नित्योत्सवं कर्तव्य विधिः

कर्मशक्तिं समावाह्य बलिबेरे नियोजयेत्।

बलिबिम्बं समुद्धृत्य डोलारोपण माविशेत्।

नित्योत्सवं समारोप्य तद्विम्बं शिभिकादिभिः।

आरोपयित्वातु शिरसि परिभ्रमण माचरेत्।

बलिप्रदानेन विधिना उत्सवाभ्युदयावहम्।

शुक्लाम्बरधरं सौम्यं शुक्लयज्ञोपवीतकम्।

परिचारकमाहूय भावितं गरुडात्मना।

तन्मूर्ध्नि चरुपात्रस्थ तण्डुलेन प्रसूनके।

शिरसा धारयेद्विप्रान् घण्टा नादं च घोषयेत्।

शूद्रेषु धारयेद् डोलां बलिदानं च निष्फलम्।

तस्मात्सर्व प्रयत्नेन विप्रेषु धारयेत् क्रमात्। (जयोत्तरे)

नित्योत्सव बेरमलाभे स्वयंव्यक्तादि क्षेत्रेषु कर्तव्य विधिः

स्वयंव्यक्तेच दिव्येच मखार्चा रहितेऽपिवा।

तत्र नित्योत्सवविधिं वदामि कमलेक्षणे।

हेमादि पटले शुद्धे पूरयेत् द्रोण तण्डुलम्।

तमिन् पद्मं समालिख्य शोधयेच्छोषणादिभिः।

तन्मध्ये पीठमाकल्प्य वासुदेवं चतुर्भुजम्।

मूलभेरात्समावाह्य यजेद घ्र्यादिभिस्सह।

शुक्लांबरधरं सौम्यं शुक्लयज्ञोपवीतकम्।

सोत्तरीयं च सोष्णीषं चन्दनाद्यैरलंकृतम्।

ध्यात्वा तंविनतानन्दं परिचारक वरं शुभम्।

तन्मू र्ध्नि पटलं न्यस्य यात्रोपकरणैस्सह।

धामप्रदक्षिणी कृत्य पात्रस्थं परमेश्वरम्। (श्रीः)

एकदिन उत्सव काल नियमः

माघमासे पुनर्वस्वो श्चैत्रेवा द्वितयेपिवा।

वैशाखे श्रवणे ऋक्षे रोहिण्यां श्रवणे तथा।

आद्र्रायां मार्गशीर्षाख्ये आषाढे हस्त तारके।

कार्तिके मासि रोहिण्यामन्येष्वेवं विविधेष्वपि।

अवतार दिनेष्वेवं कुर्यादेकाहमुत्सवम्। (पारमे)

पंच पर्वाणां नामानि

पक्षे पक्षेच द्वादश्यां मासे मासे तथैव च।

अमावास्यां पौर्णमास्यां श्रवणेचोत्तरे तथा।

अवतार दिनेष्वेवं देवदेवस्यवै द्विजाः। (ईश्वरं)

<u>अन्यत्र</u>

एकादश्यां पौर्णमास्यां दर्शे संक्रमणेपिच।

पञ्चपर्वोत्सवं ब्रह्मन् सर्वदोषोपशान्तये। (वि-तिलकं)

तेषु उत्तम विषयः

नक्षत्रेषुच सर्वेषु श्रवणंचोत्तमं भवेत्।

तिथीनां द्वादशी श्रेष्टा वाराणां शुक्रवासरम्।

योगानांतु व्यतीपातं करणान्तु विशिष्टिकम्। (अनिरुद्धं)

षण्णामध्वर उत्सवानां नामानि

अतःपरं ते कमले षण्णामध्वर संज्ञिनाम्।

क्रमंतु कथयामास वासुदेवस्य शार्ङ्गिणः।

विष्णोराविर्भावऋषेच दर्श श्रवणयोस्तथा।

एकादश्यां संक्रमेच षड्विधौचोत्सवाः स्मृताः।

नोत्सवः श्रवणे यत्र विष्णोरायतने शुभे।

पञ्चपर्वोत्सवं नाम मासि मासि भवेद्रमे। (श्रीः)

तेषु भेदानि संप्राप्ते कर्तव्य नियमः

नक्षत्र भेदे संप्राप्ते पूर्वमेव फलप्रदम्।

परेद्युर्दशनाडीचेत् परमेव फलप्रदम्।

एकादश्याममावास्यां द्वादश्यादिषुवा द्विजाः।

परेद्युश्चेत्कला मात्रं परमेव शुभप्रदम्। (ईश्वरं)

मासभेदेन उत्सव भेदाः

माघमासेतु माघर्क्षे दमनारोपणं चरेत्।

फल्गुने मासि ऋक्षेच तुलस्यारोपणं चरेत्।

चैत्रेतुमासे ऋक्षेतु चंपकाराधनं चरेत्।

वैशाख मास ऋक्षेच शतपत्रेण पूजयेत्।

ज्येष्ठमासे विशेषेण फलो(प्लवो)त्सवविधिं चरेत्।

अनुराधेतु विप्रेन्द्रामावास्यां श्रवणेपिवा।

स्नापयेत्सहस्र कलशैः तदर्धैर्वा तदर्धकैः।

अष्टोत्तर शतैर्वापि तन्यूनं न समाचरेत्।

आषाडेमासि मासऋषे सहकारफलैर्यजेत्।

श्रवणेमासि मासऋषे पूजयेत्कदली फलैः।

भाद्रपदे मासि ऋक्षेपङ्कजाराधनं चरेत्।

आश्वयुजे मासि मासव्रषे श्वेत पद्मैः समर्चयेत्।

कार्तिके मासि मासर्क्षे दीपारोपणमाचरेत्।

मार्गशीर्षेमासि ऋक्षेच गन्धालेपनमाचरेत्।

पुष्येमासि सिते पक्षे हरिद्रालेपनं चरेत्। (अनिरुद्धं)

अयन भेदेन समय भेदाः

उत्तरायण पूर्वेषु षट्सु संक्रान्त्यादिषुवा द्विजाः।

पश्चात् षोडशनाडीनामन्तरे देवमर्चयेत्।

दक्षिणायन पूर्वेषु षट्सु संक्रमणेषु च.

प्रागेवाभ्यर्चयेद्देवं नाडी षोडशकान्तरे।(ईश्वरं)

चैत्रमासे जलक्रीडोत्सवे विविध युद्धोत्सवाः

मधुमाधव मासेतु शुक्लपक्षे विशेषतः।

कलयापि चतुर्दश्याह्यपृष्टे पर्वणि द्विजाः।

जलक्रीडांतु देवस्य कुर्याद्देशिक सत्तमाः।

मध्याह्ने बलिदानान्ते यात्रामूर्तिं गतं विभुम्।

शिभिकायां समारोप्य श्री पुष्टिभ्यां सहद्विजाः।

चूर्णाधिवासनं प्राग्वत्कृत्वा देशिक सत्तमाः।

श्री सूक्तेन ततो देवम् श्रियं पुष्टिंच देशिकः।

अभिषिच्यच चूर्णेन हरिद्रेण यथा विधिः।

देवीभ्यां सह देवेशं भ्रामयेद् ग्राम वीथिषु।

ततोदेवस्य देव्योश्च युद्ध क्रीडां च कारयेत्।

प्रथमे गन्धयुद्धंच द्वितीये पुष्पयुद्धकम्।

तृतीये चूर्णयुद्धंच चतुर्थे तैल युद्धकम्।

पञ्चमे क्षीरयुद्धंच षष्टेतु कर्पूर कुङ्कुमैः।

नारिकेळजलैर्युद्धं सप्तमेतु समाचरेत्।

गन्धांभसाऽष्टमे युद्धं नवमे जलयुद्धकम्।

युद्धक्रीडांतु तत्रैव देवमन्तःप्रवेशयेत्। (ईश्वरं-पाद्मोद्भवे)

तेषामुत्सव फलविषये

परस्परंच सिंचेयुः सर्वे मङ्गल वारिभिः।

गङ्गास्नान फलं प्राप्य विष्णुसायुज्य माप्नुयुः। (ईश्वरं)

तथैव यानारूडस्य कारणमाह

यानेदेव समारोप्य सह स्नानाद्र्ववाससा।

जलक्रीडपुरस्कं तु यात्रोपकरणैस्सह।

भ्रामयेद्ग्राम वीथीषु प्रीतये वरुणस्यच।

प्रजानामपि सर्वेषां पवित्रीकरणायच। (ईश्वरं)

<u>चैत्रमास उत्सवे श्रीरामनवमि विषये</u>

चैत्रशुद्धे शुक्लपक्षे नवम्यां सोमवासरे।

पुनर्वसुभ्यां संयुक्ते कुलीरेऽभिजिते तथा।

प्रद्युम्नो रामरूपेण सूर्यवंशेऽजनिष्ट हि।

तस्मिन् काले लक्ष्मणेन शत्रुघ्नेन च सीतया।

भरतेनाञ्जनेयेन राघवं पूजयेद् गुरुः।।(श्रीः)

विशाखोत्सव दिन निर्णयमाह

वृषभस्ते दिनकरे पौर्णमास्यांतु वा भवेत्।

विशाखा ऋक्षयुक्ता वा ह्ययुक्तावा द्विजोत्तमाः।

चतुर्दश्याह्यविद्धायां तस्यामुत्सव माचरेत्।(ईश्वरे-)

अन्यत्र

वैशाखस्य सिते पक्षे विशाखापूर्णिमा युता।

तस्यामृक्षे पूजनेच कुर्याद् भागवतोत्तमाः।

तिथ्ययोगेऽपि नक्षत्रे मुख्यमुत्सव मीरितम्।

ऋक्षहीन तिथौ पूजामासुरं स्यान्निरर्थकम्।(श्रीः)

वसन्तोत्सवस्य कारणमाह

वसन्त काल तृप्त्यर्थं तत्समृद्धिभिराहृतैः।

पुष्पैर्नानाविधै र्देवमर्चयेद्दक्षिणामुखम्।

आसीनंमण्डपं कृत्ते वेदिमध्ये मनोरमे।

पुष्पान्वितैः प्रपां कृत्वा मण्टपे पूजयेद्धरिम्।(पाद्मं)

वसन्तोत्सव कृते फलमाह

एवं यः पूजयेद्देवं पत्र पुष्प फलादिभिः।

तस्य सस्य समृद्धिः स्यात्फलं च सुमहद्भवेत्।(श्रीः)

कल्हार अथवा दमनिकोत्सव विषयः

वैशाखे मासि चैत्रे वै सिते पक्षे शुभेदिने।

कारयेदुत्सवं दिव्यं कल्हार कुसुमैर्मुदा।

द्वादश्यां पौर्णमास्यां वा पुष्पालङ्कारमाचरेत्।

दमनारोपणं ब्रह्मन् अथवाचोभयं सह। (पाद्मोद्भवं)

<u>अन्यत्र</u>

तमुत्सवं प्रवक्ष्यामि वृद्धिदं सर्व देहिनाम्।

ऋतुराजे वसन्तेवा तथा शरदि वा रमे।

ज्येष्टेवा श्रावणेमासे पुष्येवा फाल्गुनेऽपिवा।

पूर्व पक्षेच पञ्चम्यां द्वादश्यां पूर्वयोरपि।

रोहिणीश्रवणाश्विन्योरुत्तर त्रितयेऽपिच।

यजमानानुकूलेषु तिथितारेषु वा बुधः।

प्रार्थितो यजमनेन कुर्याद्देशिक सत्तमः।

कल्हारैर्भगवद्यागं देशोपद्रव शान्तये। (श्रीः)

कल्हारपुष्पस्य अधिदेवता विषये

प्रार्थयेच्च ततो देवीं वसुधां वसुदायिनीम्।

देवीत्वद्धस्त कल्हार कुसुमैरर्चयेद् विभुम्।

राज्यस्य दोषशान्त्यर्थं प्रीतये तव मेदिनी।

इति संप्रार्थ्य तद्धस्तात् कुम्भस्थां देशिकोत्तमः।

विनिर्गतानि पुष्पाणि ध्यात्वा दिव्यानिभावयेत्। (श्रीः)

मूर्तिभेदेन कल्हार पुष्प संख्याणां भेदाः

मूलभेरस्य कुसुमैः कुर्यात् पञ्च शतैः स्रजम्।

अष्टोत्तर शतैः पुष्पैः कर्मबिम्बस्य वै रमे।

तदर्धेन स्त्रजं कुर्यात् श्रीभूम्योः स्त्रजमुत्तमम्।

मखार्चाप्रभृतीनाम्तु पञ्च विंशतिभिः स्त्रजम्।

कारयेद् विधिनामाला तत्तद्बिम्बानुसारतः। (श्रीः)

एतत् कल्हार उत्सवस्य फलमाह

उत्सवं सर्वलोकानां देवानामिष्ट सिद्धिदम्।

परचक्र प्रवेशेपि शत्रुभिः परिपीडिते।

महामारिकया भूमौ सर्वस्मिन् जननाशने।

महोत्पादादिभिर्लोके पीडितेवा ग्रहादिभिः।

तदाभुवं पूजयित्वा कल्हारोत्सवमाचरेत्।

राजा भूमिमवाप्नोति हन्यन्ते शत्रवस्तथा। (श्रीः)

ज्येष्ट, आषाड मास अभिषेकादि उत्सवमाह

मिथुन ज्येष्ट ऋक्षेवा पौर्णमास्यामथापिवा।

कटके शुक्लपक्षस्य ह्येकादश्या मथापिवा।

नक्षत्रेण वियुक्तायां युक्तायामापि वै रमे।

अवश्यमभिषेकस्यादेकादश्यां हरेस्तिथौ। (श्रीः)

एतदुत्सव अभिषेक फलमाह

एवंयःकारयेत्पूजां श्रद्धापूतेन चेतसा।

सर्वान् कामानिहावाप्य विष्णुलोकं सगच्छति। (पाद्मं)

अन्यत्र

ज्येष्टाभिषेक मारभ्य यावद्वासन्तिकोत्सवम्।

भगवन्मन्दिरे यस्तु कुरुते तस्य सर्वदा।

आयुरारोग्य भाग्यानि लभन्त्यत्र न संशयः।

राज राष्ट्राभि वृद्धिश्च तस्मिन्देशे भवेद्ध्रुवः।(परमपुरुषे)

सुदर्शन जयन्ति निर्णयमाह

ज्येष्टे सुदर्शनं चक्रं हेतिराजं प्रपूजयेत्।

पाराशर्य !सिते पक्षे द्वादश्यां शुक्रवासरे।

चित्रा नक्षत्रके सौम्ये लग्ने कर्कटके शुभे।

अवतारोति मे शुभ्रो दैत्यानां प्राणदायकः।

रक्षकस्तत्र भक्तानां वाञ्छितार्थ फलप्रदः।

तन्मन्त्रेण समभ्यर्च्य स्नापयेत्पूजयेत्सदा।(पाराशर्य)

श्रावणे जन्माष्टमि उत्सव निर्णयमाह

श्रावणेमासि कृष्णेच पक्षेऽष्टम्यां तिथौ हरेः।

रोहिण्यां जन्म कृष्णस्य लोकानां मङ्गलावहम्।

जयन्ती नाम साख्याता जयत्यशुभ मित्यसौ।

तिथ्यप्ययोग्येऽपि नक्षत्रे केवलेऽर्चनमिष्यते। (पाद्मे)

जन्माष्टमि दिन निर्णयं

चन्द्रोदयेऽष्टमी युक्ता सप्तमी कलया विना।

रोहिणी रहितावापि साहि जन्माष्टमी स्मृता।(ई)

अन्यत्र

सिंहमासे कृष्णपक्षेत्वष्टम्यां रोहिणी शुभे।

हर्षकौलव संयुक्ते बुधवारे शुभे दिने।

कन्यांगते बुधे शुक्ले लग्नगे च बृहस्पतौ।

मकरे भूमि पुत्रे च तुलायां च शनौ स्थिते।

कटकेच स्थिते राहौ केतौवा मकरे स्थितौ।

वृषभेतु मृगङ्केच आदित्ये सिंहगे सति।

निशीथे वृषभो लग्ने सर्व लोकहितो हरिः।

वसुदेवस्य देवक्यां जातः कृष्णो भृगूद्भवे।

तत्कालेतु विशेषेण कृष्ण रूपि जनार्दनः।(श्रीः)

श्रीजयन्ति निर्णयमाह

सूर्योदयेपि सप्तम्या तथाकृत्तिकयापिच।

कलयापिह्यविद्धावा रोहिणी द्विजपुङ्गवाः।

अष्टमी सहितावापि अष्टमी रहितापिवा।

जयन्ती नाम साप्रोक्ता जयत्यशुभमित्यसौ।ईश्वरं,

अन्यत्र

अष्टम्यां वा नवम्यां वा दशम्यांवापि रोहिणी।

अविद्धा यदि लभ्येत कलामात्रापि वैष्णवैः।

ग्राह्या कदापि विद्धातु नग्राह्या वैष्णवोत्तमैः।

मृगशीर्षतु वा ग्राह्यं शुद्धव्रषस्य ह्यभावतः।

सिम्हभाद्रपदे मुख्या जयन्ती सिंहगापि वा। (परमं,ईश्वरं)

एतदुत्सवे दिनद्वय संप्राप्ते कर्तव्य विधिः

यदितद्योग कालंच द्विवारं लभते द्विजाः।

एकस्मिन् सिंहमासेतु पूर्वं हित्वा परं चरेत्।

ऋक्षप्रधाना निष्काम कर्माचरण दीक्षिताम्।

प्रपन्नानां जयन्ती स्याद्यैवं शास्त्रोक्त वर्त्मना।

द्विवारं लभते तत्र पूर्वं त्यक्त्वा परं गृहेत्।

सौम्यवासर योगेन कुर्यादेतन् महोत्सवम्। (परमपुरुषे)

एतदुत्सवे दिनभेदेन उत्तमादि भेदाः

अत्र किंचिद्विशेषोस्ति वदामि कमलेक्षणे।

विद्धादि दोषे संप्राप्ते भिद्यते बहुधोत्सवः।

अष्टमी रोहिणी पूर्णा बुधवारेण संयुता।

ताभ्यां वृषभे लग्ने बृहस्पत्युदिते तथा।

उत्तमंपूजनं तस्यां कृष्णरूपस्य वै हरेः।

बुधवार वियुक्ता स मध्यमा तु प्रकीर्तिताः।

सम्पूर्णारोहिणी यस्यामष्टमी कलयायुता।

संपूर्णायां तथाष्टम्यां रोहिणी कलयायुता ।

पूजनंतत्तिथौ कार्यं महत्पातक नाशनम्। (श्रीः)

<u>अन्यत्र</u>

परत्रैवोत्सवंकृत्वा महापातक नाशनम्।

पश्चाच्चेद्रोहिणी विद्धा पूर्वत्रैव समाचरेत्। (ई)

श्री कृष्णस्य निवेदन विषये

पायसंचैव मुद्गान्नं फलं नानाविधं तथा।

जंबुकाख्य फलंचैव विशेषेण निवेदयत्। (अनिरुद्धं)

एतदुत्सवे अर्घ्यदानस्य मन्त्रमाह

अर्घ्यदानं विशेषेण कुर्यात्सर्व फलप्रदम्।

ज्योत्स्नांपते नमस्तस्मै नमस्ते ज्योतिषांपते।

नमस्ते रोहिणी कान्त सुधाकुम्भ नमोस्तुते।

इति चन्द्रं नमस्कृत्य दद्यादर्घ्यम् ततःपरम्।

*क्षीरोदार्णव संभूताऽत्रिनेत्र समुद्भव।

गृहाणर्घ्यं शशीसोदं रोहिण्या सहित प्रभो।

जातःकंसवधार्थाय भूभारोत्तारणायच।

पाण्डवानां हितार्थाय धर्म संस्थापनाय च।

कौरवाणां विनाशाय दैत्यानां निधनाय च।

गृहाणर्घ्यं मया दत्तं देवक्या सहितो हरे। (ई)

अर्घ्यदानस्य फलमाह

प्रीणनं सर्व देवानां सर्व सस्याभिवृद्धिदम्।

कृष्णायार्घ्यं ततो दद्यान्मन्त्रेणानेन वै द्विजाः। (ई)

*एतदुत्सवे मण्डल पूजायां विशेषः

कृष्णस्य पुरतो भूमौ पिष्टेनालिप्य पद्मवत्।

अष्टभिश्च दळैर्युक्तं मध्ये विपुल कर्णिकम्।

तस्मिन् कृष्णं समावाह्य दळेष्वष्टसु वै क्रमात्।

वसुदेवं देवकींच नन्दगोपं ततःपरम्।

यशोदां रोहिणीं चैव बलभद्रं निशाकरम्।

सुभद्रं पूजयेद् देवि परिवारानिवाब्जजे। (श्रीः)

एतदुत्सवे कृष्णबिम्बमभावे कर्तव्य विधिः

स्वतन्त्रं परतन्त्रंवा कृष्णमेवं समर्चयेत्।

अभावे कृष्णबिम्बस्य तत्प्रासाद संस्थितम्।

देवमर्चयेद्भक्त्या जयन्त्यांतु विशेषतः।

एवं नृसिंहं रामं च वराहं वामनादिकम्।

तत्तज्जन्मदिने सम्यग्विशेष स्नपनेनतु।

महता हविषेनैव चतुस्थानेतु पूजयेत्। (ई)

एवं उत्सव कृते फलमाह

श्री कृष्ण जन्मदिवसे यः करोत्युत्सवं हरेः।

तस्य गोभू हिरण्यानि वर्धते नात्र संशयः।

यस्मिन् देशे कृतंचैतदुत्सवं जगतां पतेः।

तस्मिन् देशे विशेषेण गवां वृद्धिर्भविष्यति। (परमपुरुषे)

एतदुत्सवान्ते पारणकालभेदाः

मुमुक्षूणामकामानां उत्सवान्ते तु पारणम्।

पुत्रादि फलकामानां प्रातरेवहि पारणम्। (श्रीः)

पवित्रोत्सव विषयाः

पवित्रोत्सव कर्तव्य कारणमाह

संवत्सर कृता कृत्य दोषः सस्य पूर्वकः।

नाशमायाति वै क्षिप्रं पवित्रारोपणायतु।

पातियस्मात्स दोषं हि पतनात्परि रक्षति।

विशेषेण द्विजास्त्राति पूर्णं कर्म करोति च।

साधकेच क्रिया हीने तस्मादुक्तो मया महान्।

याग एष पवित्राख्य उक्त लक्षण लक्षितः। (पारमे, ई)

<u>अन्यत्र</u>

पवित्र कर्म हीनेतु नित्यपूजा विनश्यति।

नित्यपूजा विनाशेन राष्ट्रं क्षयमवाप्नुयात्।

तद्ग्रामो निधनं याति तत्स्थानं नाशनं भवेत्।

तस्मात्सर्व प्रय्त्नेन पवित्रारोपणं चरेत्। (अनिरुद्धं)

<u>अन्यत्र</u>

संवत्सरं नरो भक्त्या समभ्यर्च्य जनार्दनम्

यत्फलं समवाप्नोति पवित्रारोपणेन तत्।

तस्माद्भक्ति समायुक्तैः नरैः विष्णुपरायणैः।

वर्षे वर्षेतु कर्तव्यं पवित्रारोपणं परम्। (मार्कण्डेयं)

पवित्रोत्सव निर्वचनमाह

मन्त्रलोपादिना कर्म पतितं विहितं पुनः।

प्रायश्चित्तेन तत्कर्म कर्तारं त्रायते पुनः।

तत्पवित्रं फलैर्भूयो रोहत्येव समाहितम्।

इति निर्वचनात्तज्ज्ञैः पवित्रारोहणं मतम्। (पाद्मं)

अन्यत्र

पतनात् त्रायते तस्मात्पवित्रम्परिकीर्तितम्। (अनिरुद्धं)

पवित्रोत्सवकृत कालभेदे चान्द्र, सौर, वैष्णव भेदाः

आषाढ पञ्च दश्यांस्तु यावद्वै कार्तिकस्य च।

संपूर्णं चन्द्र दिवसम् तं कालं चान्द्रमन्तिमम्।

आकर्कट सङ्क्रान्तेस्तुला भागक्षयावधि।

कालंतमष्ट पक्षंच सौरं मध्यम संज्ञितम्।

एकादश्यां दिनान्तो यश्चातुर्मास्योप लक्षितः।

कालंतम् वैष्णवं विद्धितूत्तमं सर्व सिद्धिदम्। (पारमे, ई)

चातुर्मासस्य त्रिविधाः

चातुर्मास्यं त्रिधाप्रोक्तं सौरश्चान्द्र मासं तथा।

वैष्णवंच विशेषेण त्रिविधं संप्रकीर्तितम्। (अनिरुद्धं)

तेषां लक्षणमाह

संक्रान्त्याधिकं सौरंस्यात् चान्द्रश्च प्रथमादिकम्।

द्वादश्यादि त्रिकंचैव वैष्णवं परिकीर्तितम्। (अनिरुद्धं)

तेषु उत्तमादि भेदाः

वैष्णवंचोत्तमं प्रोक्तं मध्यमं सौरमुच्यते।

चान्द्रमप्यधमं प्रोक्तं उत्तमेतु समाचरेत्। (अनिरुद्धं)

दिननिर्णयमाह

चातुर्मास्येत्सवाऽन्यतमे मासे वै शुक्लपक्षके।

द्वादश्यां देवदेवस्य पवित्रारोपणमाचरेत्। (पारमे, ई)

अन्यत्र

पूर्वोदितेषु मासेषु शुक्लपक्षेऽमृतोद्भवे।

प्रथमायां तृतीयायां पञ्चम्यामथवा तिथौ।

एकादश्यां दशम्यांवा त्रयोदश्यामथापिवा।

द्वादश्यां पूर्णिमायां वा नक्षत्रे यमदैवते।

रोहिण्यां पुष्य नक्षत्रे मृगशीर्षे मखेऽपिवा।

चित्रर्क्षे श्रवणेवापि रेवत्यस्विनि तारके।

तत्तन्मासस्य नक्षत्रे पूर्णिमारहिताऽपिवा। (ईश्वरं,पारमे,श्रीः पाद्मं)

पवित्रेषु सूत्र भेदाः

प्रथं दर्भसूत्रंतु पट्ट सूत्रमतः परम्।

तृतीयं क्षौमसूत्रंतु पद्मसूत्रमतः परम्.

कार्पास सूत्रमथवा वेत्रसूत्रमथापिवा।

कन्यया कृत सूत्रंतु नारीयातु पतिव्रता। (मार्कण्डेयं)

पवित्रेषु उत्तमादि भेदाः

पञ्च वर्णसमायुक्तम् पञ्च यष्टि समन्वितम्।

पवित्रंचोत्तमम् ज्ञेयम् यष्टित्रय समन्वितम्।

पवित्रं मध्यमं प्रोक्तमधमं एक यष्टिकम्। (श्रीः)

अन्यत्र

शिर आरभ्य नाभ्यन्तं पवित्रंतु कनीयसम्।

ऊरुमात्रं तथारभ्य पवित्रं मध्यमं स्मृतम्।

उत्तमं जानुमात्रंतु पवित्राणां प्रमाणतः। (मार्कण्डेयं)

पवित्राणां स्थानभेदेन नामभेदानि

जान्वन्तं वनमालेति नाभ्यन्तं कौस्तुभं स्मृतम्।

वक्षस्थलान्तं श्रीवत्सं किरीटाख्यं शिरः स्थितम्।

देवीनाम्च श्रियादीनां पवित्रं पद्म संज्ञितम्।

पवित्रमन्य देवानां सुदर्शनमितीरितम्।

द्वारतोरण कुम्भानां पवित्रं शंख संज्ञितम्।

मानुषाणां पवित्रंतु चक्रमित्यभिधीयते। (श्रीः)

आचार्यादीनां पवित्र मानविषये

आचार्यानां यतीनांच द्विजातीनां सलक्षणम्।

पवित्रं नाभि पर्यन्तंअन्येषांस्तनमात्रकम्। (श्रीः,मार्कण्डेयं)

अन्यत्र

अष्टोत्तरेण सहस्त्राणां शतेण ग्रन्थिभिस्तथा।

शिरःपूर्वावतारादौ यावत्पीठंतु वैष्णवम्। (पारमे)

अन्यत्र

बिम्बानां मनुजानां वा नाभिमानं प्रकल्पयेत्।

ग्रंध्याह्वय पवित्रं तु हृन्मानं परिकल्पयेत्।

अलंकार पवित्रंतु जंघामानं चतुर्मुख।

मर्यादाख्या पवित्राणि जानुमानं चतुर्मुख।

किरीटादि पवित्राणि बहुग्रन्थियुतानिच। (विष्णुतिलकं)

अन्यत्र

तन्तूनां द्वादशज्ञेयं परिवार पवित्रकम्।

आचार्यस्य पवित्रं हि तन्तूनां सप्तविंशतिः।

अष्टाविंशति तन्तूनां कुण्डस्य च पवित्रकम्।

चत्वारिंशतु तन्तूनां प्रासादस्य पवित्रकम्।

चत्वारिंशत्तु तन्तूनां धूप दण्ड पवित्रकम्।

पञ्च विंशति तन्तूनां पट्टिकानांपवित्रकम्।

अष्टा विंशति तन्तूनां आलयस्य पवित्रकम्।

एकोनत्रिंशत्तन्तूनां गोपुरस्य पवित्रकम्।

पञ्चत्रिंशत्तन्तूनां प्रासादस्य पवित्रकम्।

नवत्रिं शत्तु तन्तूनां बलिपीठ पवित्रकम्।

उप पीठ पवित्रंतु पञ्च विंशति तन्तवः। (मार्कण्डेयं)

अधिवासस्य पवित्र लक्षणमाह

पवित्रमधिवासार्थमाद्यं नाभ्यावधि स्मृतम्।

अष्टोत्तर शतैस्सूत्रैः द्वात्रिं शद् ग्रन्थिभिर्युतम्।

मूलभेरादि भेराणां पवित्रमिदमिष्यते।

पवित्रं मण्डले पद्मतुल्यमानं घटेपिच।

कुण्डेच मेखलामानं पूर्वेद्युर्मानमीरितम्। (पाद्मं)

अन्यत्र

एवमानेः पवित्रेद्वे प्रदद्याद् द्विजसत्तम।

यद्वाकिरीटमाद्येतु मध्ये श्रीवत्स कौस्तुभे।

तृतीये वनमालांच मन्त्रैरेभिस्तु विन्यसेत्। (पारमे)

अधिवास कार्य क्रमाणि

प्रोक्षणं ताडनंदाहमुत्पाटापूरणं तथा।

लोहकार मृत्तिकाभिर्भोगिकालंच पूजनम्।

सांस्पर्शञ्चेति दशधा सर्वभोगेषु संस्कृतिः। (अनिरुद्धं)

अधिवास होम विषये

मण्डलस्योत्तरे देशे जुहुयात्तन्तु संख्यया।

ग्रन्थीनां संख्ययाचैव जुहुयात्प्रणवेनतु।

समिधो हविराज्यं च होमद्रव्याणि देशिकः।

हुत्वा संपात विधिना पवित्राणि च संस्पृशेत्। (मार्कण्डेयं)

मण्डल पवित्रस्य लक्षणमाह

मण्डलस्य प्रमाणेन कुर्याच्चान्यच्चतुष्टयम्।

प्रथमं पद्ममानेन नाभिमानं द्वितीयकम्।

अरतुल्यं त्रितीयंस्यात् चतुर्थीं नेमिभिः समम्।

एकाशीतिभिरावर्तैः सूत्राणां द्विज सत्तम। (पारमे.ईश्वरे)

पवित्र समर्पणे मन्त्रमाह

चक्राब्ज मण्डलेमन्त्रमिदंविष्णुरिति ब्रुवम्।

प्रविश्य मन्दिरं सर्वै मङ्गलैस्सह देशिकः।

मूलभेरं समासाद्य पवित्र न्यसनं ततः।

पूर्वोदितेन मन्त्रेण सर्वार्चास्युर्यथाक्रमम्। (पाद्मं)

यागशालायां द्वार पूजा विषये

ईशान दिशिवा न्यस्त्वा यागस्येच्छानु सारतः।

तद्गर्भी कृत्य संलिख्य हेतिराट् चन्दनादिना।

चक्रं ध्यात्वा मण्डपोर्ध्वे पङ्कजं वसुधातले।

निर्गमेच गदांदेवीं शङ्खं च ककुभाष्टकौ।

प्राकाराकार देहांच नानाज्वाला समाकुलाम्।

शक्ति रूपां गदांवाथ केवलं मन्त्रतोन्यसेत्। (पारमे,पाद्मं)

माषान्न बलिदानस्य कारणमाह

प्रत्यूह कारिणां तस्य छिद्रमन्विप्य धावताम्।

भूतानां राक्षसादीनां माषान्नेन बलिं क्षिपेत्। (पाद्मं)

हवनविषये द्रव्यानां नामानि

अग्नौच जुहुयादन्नं पायसादि चतुर्विधम्।

पौरुषेणैव सूक्तेन यवैश्च व्रीहि वेणुभिः।

तिलैर्लाजैस्तथा पुष्पैः तथाचागरुभिर्घृतैः।

समिद्भिर्मूलमन्त्रेण पृथगष्टोत्तरं शतम्.(पाद्मं)

एतदुत्सवे चतुस्थान पूजनस्य मन्त्रमाह

अष्टाक्षरेण मन्त्रेण महाकुम्भेतु पूजयेत्।

द्वादशाक्षर मन्त्रेण मण्डलेतु समर्चयेत्।

विष्णुमन्त्रेण विप्रेन्द्र अग्निस्थं हरिमर्चयेत्।

उत्सवेतु विशेषेण गायत्रिया संप्रपूजयेत्।(अनिरुद्धं)

कुंभमण्डलादीनां पूजन विषये

कुम्भमण्डलयोः प्रात र्मध्याह्नेहरिमर्चयेत्।

रात्रावग्निषु पूजास्याद्विभवे सत्ययं विधिः।(श्रीः)

<u>अन्यत्र</u>

संहिताद्यैश्चतुर्भिस्तु कुम्भे संपूजयेद्धरिम्।

शाखाद्यैमण्डलैः प्रोक्तमारणाद्यैस्तु बिम्बकैः।

कुम्भेचाऽष्टाक्षरेणैव मण्डयेद् द्वादशाक्षरम्।

बिम्बेच विष्णुगायत्र्या कुण्डेचैव षडक्षरम्।(भारद्वाजम्)

उत्सवे पूजन विषये संख्या नियममाह

चतुःस्थानेषु देवस्य पूजा संख्यामिमां श्रुणु।

शतोत्तर सहस्रम्वा सप्तत्युत्तर षड्शतम्।

अथवा पूजनं कुर्यात् षष्ट्युत्तर शतत्रयम्।

विभज्य कुर्यात्पूजांवै सान्निध्याधिक सिद्धये। (श्रीः)

उपकुम्भानां पूजने दिङ्निर्णयमाह

उपकुम्भेषु सर्वेषु वासुदेवादि मन्त्रतः।

वारुणादि नैऋत्यान्तं योजयेन्मन्त्रवित्तमः। (अनिरुद्धं)

अवभृतकाले तत्तीर्थे सर्व तीर्थ सान्निध्य विषयः

पूर्वामुखंच तद्यानमादाय च पवित्रकम्।

वामहस्त तले कुर्यात् क्ष्मामण्डल गतंत्विव।

विधृयान्मध्य भागाच्च पाणिना दक्षिणेनतु।

अवतीर्यांभसो मध्यं निमज्जेत् सहतेन वै।

सन्निधिं तत्र तत्कालं प्रकुर्वत्यचिरात्तु वै।

निश्शेषाणिच तीर्थानि लोकत्रय गतानि च।

मन्त्रात्मा यत्र रक्षार्थं क्षणमास्थे जलाशये।

तत्रायतन तीर्थानां सर्वेषांस्यात् समागतः।

मुहूर्ताऽतिक्रम दोषस्तत्र न विद्यते। (पारमे)

पवित्राणां अवरोपण विषये

उच्चरन् पौरुषं सूक्तम् सामं यद्वा रथन्तरम्।

त्रिसुपर्णं तथा मन्त्रं मूलमन्त्रमथापिवा।

अवरोप्य पवित्राणि देयानि गुरवे ततः। (पाद्मं)

<u>अन्यत्र</u>

यन्मया ब्रह्म सूत्रंच कल्पितम् ग्राहयस्य च।

कर्मणां पूरणार्थाय यथा दोषो नमे भवेत्। (पारमे)

अन्यत्र

विसर्जयेत्पवित्राणि विष्वक्सेनाय दापयेत्।

विष्वक्सेन प्रसादंच आचार्याय निवेदयेत्। (मार्कण्डेयं)

पवित्रोत्सव कृते फल निरूपणमाह

इत्युक्तं योगिनां श्रेष्ट पवित्रारोहणं परम्।

ऊनातिरिक्ताद्यत् पाति भुवि भक्त जनं सदा।

तस्य निर्वर्तयद्भक्त्या ब्राह्मणो वेदविद्भवेत्।

श्रीमानत्युग्र शक्तिर्वै क्षत्रियोऽच्छिन्न सन्ततिः।

धन धान्ययुतो वैश्यःशूद्रस्तुसुखदाभवेत्। (पारमे,ईश्वरं)

पवित्रमालां धारणे फलमाह

धारयन्ति पवित्राणि ये भक्ताः श्रद्धयान्विताः।

तेऽपि निर्धूत पापानि मोदन्ते दिविदेववत्।

आचार्यो मूर्तिपास्सर्वे येचान्ये परिचारकाः।

येश्रृण्वन्ति च पश्यन्ति कीर्तयन्तिच कर्म तत्।

ते सर्वेपि समृद्धार्था लभन्ते नात्र संशयः। (पाद्मं)

अन्यत्र

पवित्र धारणाद्विप्र सर्वपापहरं भवेत्।

सर्वयज्ञ फलंचैव सर्व तीर्थ फलंभवेत्। (अनिरुद्धं)

अन्यत्र

पवित्रोत्सव कालेतु वासुदेवस्य चक्रिणः।

पूजालोपादि शान्त्यर्थं अर्पितंतु पवित्रकम्।

भक्त्या यो धारयेन्नित्यं तस्य कुत्रापिच द्विजाः।

कर्मलोपंतु नभवेत् इति शास्त्र विनिश्चयः। (परमपुरुषं)

अन्यत्र

पवित्राराधनं विष्णोः श्रद्धया यःकरोतिच।

सयाति ब्रह्मणःस्थानं विष्णु सायुज्यमाप्नुयात्।

सर्व पापविनिर्मुक्तस्सर्व दुःख विवर्जितः।

यथाऽश्वमेधं विप्राणां राजसूयुश्च भूभुजाम्।

यथास्वधा पितृणांच सुराणाममृतं यथा।

नराणाम् जाह्नवी तोयम् देवानां अच्युतो यथा।

तथाहि देव देवस्य पवित्रारोपणम् परम्। (अनिरुद्धे)

अन्यत्र

एवं हि विधिवत्कृत्वा पवित्रारोपणं परम्।

विष्णु सायुज्यमाप्नोति पुनरावृत्ति वर्जितम्। (मार्कण्डेयं)

भाद्रपदमास अपराजित (विजय दशमि) उत्सव विषयः

एतदुत्सव कृत कारणमाह

पूजयन्ति नमस्यन्ति वानप्रस्थाः कदाचन।

दिदृक्षा यदि तेषां वै तत्कालः कथ्यतां हरे।....।

अश्वमारोप्य देवेशं अलंकृत्यच भूषणैः।

संनद्धैसायुधैश्चैव भृत्यैर्नीत्वा महा वनम्।

तत्र ध्यानपरैर्नित्यं वानप्रस्थैः समर्पितम्।

कन्दमूलफलं चान्यद् गुरुदेवी निवेदयेत्। (श्रीः)

एतदुत्सवस्य दिननिर्णये

ईषस्य दशमीं शुक्लां विजयांतां विदुर्बुधाः।

तस्मिन्नेवतु देवस्य विजयोत्सवमाचरेत्।

नवमीकलयाचैव विद्धात्याज्या भवेत्सदा।

परवेधायुतायांतु दशम्यामुत्सवं चरेत्।

श्रवणक्षायुतांचापि पूर्वविद्धां परित्यजेत्।.....

राज्ञापट्टाभिषेकार्थं पूर्वविद्धादि दूषितम्।

दशमींतु परित्यज्य शुद्धमेव परिग्रहेत्। (परमपुरुषं)

महा नवमिकोत्सव(दशमिदिन) विशेषमाह

वक्ष्यमाणेन विधिना कुर्याद्राष्ट्राभिवृद्धिदम्।

नवम्यामेव देवस्य तुरगंच विशेषतः।

अलङ्कृतं तथास्त्रौघं देवस्य धनुरादिकम्।....

तत्रदेवस्य तुरगम् तार्क्ष्य मन्त्रेण मन्त्रवित्।

समभ्यच्र्याऽर्घ्य गन्धाद्यैःहविरन्तं समर्चयेत्।

आयुधान्यर्चये त्तद्वत्तत्तन्मन्त्रेण देशिकः।

दशम्यां देवदेवस्य कृत्वा नित्यार्चनं पुरा।....

भद्रासने समावेश्य वह्निवृक्षस्य मूलतः।।

आयुधानि समभ्यर्च्य पुण्याहोक्ति पुरस्सरम्।

शमी पत्रंतु संगृह्य मूलमन्त्रेण देशिकः।

दत्वा देवस्य शिरसि अर्घ्याद्यैः संप्रपूज्य च।

ताम्बूलं विनिवेद्याथ देशिकेन्द्रस्तदनुज्ञया। (ईश्वरं,श्रीः)

तुरगस्यापि रक्षाबन्धन विषयमाह

नवरात्रात्मकं कार्यमीषे सिते महाव्रतम्।..

तुरगान् स्नापयित्वादौ चणकादीन् निवेदयेत्।

रक्षयाबन्धनं लक्ष्म्या अश्वादीनांच कारयेत्।

गारुडेनैव मन्त्रेण ह्यश्वादीनर्चयेत्क्रमात्। ...(पाराशर्यं)

वह्निवृक्षं परिक्रम्य तुरगान् भ्रामयेत्तदा।

शमीमन्त्रेण पत्रेण देवाभिषेकमाचरेत्। (पाराशर्यं)

चतुर्दिक्षु बाणान् प्रयुज्य विषये तत्फलानिच

धनुर्बाणान् समादाय सर्वदिग्विजयायच।

सर्वशत्रुविनाशाय राजराष्ट्राभिवृद्धये।

चतुर्दिक्षु चतुर्बाणान् ऊर्ध्वाऽधश्च शरद्वयम्।

प्रयुञ्जेदस्त्रमन्त्रेण धन्वनागेति वा ऋचा।

ततोऽर्चयेद्देव देवं विविधैरुपचारकैः। (ईश्वरं)

तदुत्सवे समर्पित शमीपल्लवादि धारणे फलमाह

आस्विनस्य सिते पक्षे दशंयां विजयोत्सवे।

शमीपल्लवस्ययुक्तानक्षतान् यो परिग्रहेत्।

तस्य सर्वत्र विजयं सर्वकार्येषु निश्चयम्। (परमपुरुषं)

भाद्रपद मासे वराहपूजने विशेषफलमाह

मासि भाद्रपदे देवं श्रावणेचादि पूरुषम्।

वराहदेवं सुभगं हिरण्याक्षसुरद्विषम्।

यजेत देव्या धरया सार्धं सर्वार्थ सिद्धये। (पाद्मं)

आश्वयुज मासे नरकचतुर्दशिउत्सव करणे फलमाह

अपरं देवि वक्ष्यामि उत्सवं पुष्टिकामदम्।

स्वर्गदंचापि सर्वेषां वैष्णवानांच मुक्तिदम्।

कर्तव्य नियमः

आश्वयुक् कृष्णपक्षस्य चतुर्दश्यां विधूदये।

तैलेन स्नापयेद्देवमवशिष्टेन वै गुरुः।

शिरसाधारयेत् पूर्वं भक्तेभ्यो धारयेत्ततः।

भगवद्गात्र संस्पृष्टं तैलं मन्त्रैश्च मन्त्रितम्।

शिरसा धारयेयुस्ते शरीरेषु नलिम्पयेत्। (श्रीः)

अन्यत्र आग्रयण उत्सवसमयाः

आग्रयणं श्रावणे मासि मासिप्रोष्टपदेऽपिवा।

मासेचाश्वयुजे ब्रह्मन् कार्तिकेमासिवा भवेत्।

वर्षेष्वेवं ततोऽन्यत्र तैष्ये माघेपिवा यजेत्। (पाद्मं)

(आश्वयुज मासे महालक्ष्मि उत्सव करणे विशेष विधिः)

दिन विकल्पः

अथचाश्वयुजे मासि कर्तव्यं सर्व सिद्धिदम्।

वीरलक्ष्म्युत्सव विधिं वक्ष्यामि मुनिसत्तमाः।(ई)

अन्यत्र

तस्मिन् मासे सिते पक्षेह्यष्टमी कलयापिवा।

अविद्धायां नवम्यांतु श्रीदेव्युत्सव माचरेत्।(ई)

कुम्भ पूजनविषये विशेषः

कुम्भेच मण्डले बिम्बे वह्नौ चापि यथाविधि।...

कुम्भार्चने श्रियं देवीं मध्य कुम्भे समर्चयेत्।

सुदर्शनंच वर्धन्यां प्राग्वदेव समर्चयेत्।

लक्ष्मीः कीर्तिर्जया माया उपकुम्भाष्टके द्विजाः।

प्रभवाप्यय योगेण पूज्याः प्रागादिषु क्रमात्।(ई)

बिम्ब पूजने विशेषमाह

हेमपीठे समारोप्य ह्यलङ्कारासनोदितैः।

भोगैः क्रमेण संपूज्य नयेद्भोज्यासनं ततः।

अर्घ्यादीनर्हणं चापि मधुपर्कं समर्चयेत्।

पृथुकादींश्चोपहारान् श्रियै देव्यै निवेदयेत्।(ई)

एवं कृते फल विशेषमाह

अश्विनस्य सिते पक्षे नवम्यां सर्वतो भुवि।

वीर लक्ष्म्युत्सवं कार्यं सर्व लोक सुखावहम्।

यःकरोत्युत्सवंचैतत्तस्यलक्ष्मीर्निश्चलाभवेत्। (परमपुरुषं)

अन्यत्र

एवं यःकारयेद्भक्त्या महानवमिकोत्सवम्।

आयुरारोग्यमैश्वर्यं तेजः कीर्तिंच सन्ततिम्।

सर्वाभीष्टंच संप्राप्य ब्रह्म सायुज्यमाप्नुयात्। (ई)

अन्यत्र

एकादश्याऽश्विने मासि ज्ञेया पाशाङ्कुशाऽभिधा।

फुल्लेन्दीवरवर्णा च हार केयूर भूषिता।

नानलङ्गार सर्वाज्ञा प्रासादसुमुखी तथा।

ध्येया देवी व्रते शुभ्रे आराध्यः पद्मनाभकः।

पद्मावत्या समं देवः सर्व शास्त्रोपनिष्ठितः।

कदळीफलमघ्येऽत्र शमी पत्राणिचार्चने।

नैवेद्य शालिपिष्टाञ्च दाने मुद्रा सुवर्णजा।

यज्ञात्सौमिक नाम्नातु फलंस्यादधिकं मुने। (सङ्कर्षणं)

कृत्तिकादीपोत्सव दिननिर्णयः

कृत्तिकासुच कार्तिक्यां पौर्णमास्यां मधुद्विषः।

कृत्तिकाभिरयोगेवा केवलायां तिथौ भवेत्।

दीपोत्सवस्तदा सर्वं शोभयेद्देव मन्दिरम्। (पाद्मं)

अन्यत्र

वृश्चिकाख्ये दिनकरे पौर्णमासीतु वा द्विजाः।

चतुर्दश्या भरण्याश्च कलयाप्यरुणोदये।

अविद्धा कृत्तिकायुक्ता ह्ययुक्तावा मुनीश्वराः।

तस्यां वृषभकाले तु दीपारोपणमाचरेत्। (ई)

अन्यत्र

कृत्तिकायां च कार्तिख्ये सायाह्ने दीपमङ्गलम्।

संस्कृत्य गार्हपत्याग्निं दीपांस्तस्मात्समानयेत्।

सायंकाले वृषेलग्ने दीपाराधनमाचरेत्।

दीपांश्चैव माहादीपान् दीपयेदग्नि तृप्तये।

निवेद्य पृथुकान्लाजान् देवायोत्सवमाचरेत्। (वि-तिलकं)

अन्यत्र

पर्वद्वयेतु संप्राप्ते तस्मिन्मासे द्विजोत्तमाः।

दीपोत्सवंतु मासान्तपर्वण्येव समाचरेत्। (ई)

अन्यत्र

पर्वद्वयं कृत्तिकाभिरयुक्तंचेत्तदा द्विजाः।

रोहिण्यावापि संयुक्ते पर्वण्युत्सवमाचरेत्।

अन्यत्र

रोहिण्याअप्ययोगेतु तदा मासान्त पर्वणि।

संक्रान्ति योग दुष्टेपि दीपरोपणमाचरेत्।

ग्रहण संभवे नियमः

संक्रान्त्याचोपरागेण दूषिते ते यदा भवेत्।

नक्षत्रं च तिथिंचैव त्यक्त्वा शुद्धदिने चरेत्।

एकाचेदुपरागेण पूर्णिमा दूषिता यदि।

पुरस्ताच्च परस्ताच्च वर्जयित्वाऽष्ट नाडिकाः।

दीपोत्सवं तदा कुर्यादग्नि तृप्त्युत्सवं शुभम्। (श्रीः)

अन्यत्र

अथचन्द्रोपरागेण दुष्टं पर्वम् यदि द्विजाः।

प्राक्पश्चादुपरागस्य सन्त्यत्त्वा सप्त नाडिकाः।

दीपं रार्त्यन्तरे कुर्याद्राज राष्ट्र सुखावहम्। (ईश्वरं)

एतद्सुत्सवस्य कारण्माह

पुरा महाबलिर्नाम मद्भक्तो दानवोत्तमः।

सर्वान् देवान्विजित्यैव त्रैलोक्यस्याधिपो भवेत्।

तं विजेतुमशक्ता वै देवा मां शरणं ययुः।....।

नीत्वा तद्राज्यभारमसुरं कारयाम्यहम्।

एवं मां प्रार्थयत्तस्मिन् काले दैत्याधिपो बलिः।

उपक्रान्ता मयातृप्तिर्वह्नि रूपस्य वैविभो।

मयाप्रीतिस्तु नाकारि विघ्नोभूत्यज्ञ संततेः।

तस्मादस्मिन् दिने भूम्यामालयेषु गृहेषुच।

अ ग्निंहुत्वा प्रदीपांस्तु दीपयेयुस्तदग्निना। (श्रीः)

दीपारोपणक्रमः, देवताः निर्णयमाह

कृत्वा देवस्यपुरतः प्राग्वत्पीठे तु विन्यसेत्।

नेत्रेणचाग्नि मन्त्रेन दीपम घ्र्यादिभिर्यजेत्।

ततः शुभे मुहूर्ते तु वृषलग्ने गुरूत्तमः।

देवमर्घ्यादिनाभ्यर्च्य दीपपात्रं समुज्वलम्।

आदाय नेत्रमन्त्रेण उद्दीप्यस्येतिवा ऋचा।

प्रदर्श्य देवदेवाय सर्वमङ्गल संयुतम्। (ई)

<u>अन्यत्र</u>

मध्यपात्रेत्वाढकेन गोघृतेन सुपूरयेत्।

परितोऽष्टसु पात्रेषु गोघृतेन यथार्हतः।

मध्यपात्रेतूर्ध्वमुखीं वर्तिं मध्ये निधापयेत्।

अन्येष्वपिच पात्रेषु इत्थमेव प्रकल्पयेत्।

पात्रस्थं श्रीशमावाह्य वह्नौ संपूजयेद्रमे। (श्रीः)

दीपाणां आज्य विशेषाः

उत्तमं कपिलाज्यं तु मध्यमं गोघृतं भवेत्।

त्याज्यं तु महिषाज्यंतु प्राणिजे वर्जयेन्नृप। (मार्कण्डेयं)

दीपस्य वर्तीनां उत्तमादि भेदाः

दीपस्य पद्मनाळं तु कार्पासंवाऽथ कारयेत्।

दीपस्य पद्मसूत्रं तु दीपानामुत्तमो भवेत्।

मध्यमं दीपनाळंतु मध्यमाङ्गुष्ट संम्मितम्।

अधमं दीप नाळंतु कनिष्ठा सदृशं भवेत्। (मार्कण्डेयं)

अन्यत्र विष्णुदीपज्वलन विषयः*

ततस्तु देवदेवेशं गोपुरद्वारमानयेत्।

तत्रद्विजाः वक्ष्यमाणं विष्णुदीपं प्रकल्पयेत्। (ई)

तेषु मानेषु उत्तमादि भेदाः

प्रासादाग्रं ततः कुर्यात् मण्टपस्याग्रतोऽपि वा।

प्रासाद सदृशम् श्रेष्टं तदर्धं मध्यमं भवेत्।

तस्यार्धमधमं ज्ञेयं दीप दण्डंतु कारयेत्। (मार्कण्डेयं)

तत्स्तम्भे देवतानियमः

शिलाभिरिष्टकाभिर्वा कल्पयेन्मुनि पुङ्गवाः।

स्तम्भाधस्तात्पूर्व भागे सिंहं दक्षेतु मारुतिम्।

पश्चिमे वैनतेयंचाप्युत्तरे हंसमालिखेत्।

एवंकृते दीप दण्डे यथा शास्त्रं सुशोभने।

मुहूर्ते तार्क्ष्य मन्त्रेण पूर्वमेव प्रतिष्ठिते।

तदा पूर्वोदितं दीप पात्रमारोपयेद्विजैः। (ई)

<u>अन्यत्र</u>

अग्निबीजमनुस्मृत्य दीपं प्रज्वालयेत्ततः।

दीपमध्ये महाविष्णुं दक्षिणे रुद्रदैवतम्।

वामेचैव विधिं पूज्य तत्तन्मन्त्रेण पूजयेत्। (मार्कण्डेयं)

<u>अन्यत्र</u>

गोपुरस्य पुरोभागे शत तालोन्नतं तुवा।

तदर्धं वा तदर्धंवा खादिरं चन्दनंतुवा।

सालंतालं नारिकेलमृजुं स्तम्भं समाहरेत्।...।

आज्यावसिक्तवस्त्रैर्वा तैल वस्त्रैर्नवैः प्रिये।

तालपत्र समूहैर्वा यद्वा वित्तानुसारतः।....।

तेभ्यो वर्तीः समादाय तत्तद्दिक्षुच दीपयेत्।

अग्नेः प्रशमनादर्वाग्राज राष्ट्राभि वृद्धये।

छेदयेद्स्तम्भमूलंतु ततो नीराजयेद्विभुम्। (श्रीः,मार्कण्डेयं)

तेषु वर्णाश्रम भेदेन आकार भेदाः

ब्रह्मवृद्धिकरंचाग्रं वृत्तं तद्राज वृद्धिदम्।

वैश्यानां वृद्धिदं प्रोक्तमष्टाश्रं तु तथैव च।

गदाशङ्ख समाकारं पद्माकारंतथैव च।

त्रिकोणज्वल पीठंतु शूद्राणामृद्धिदं स्मृतम्। (मार्कण्डेयं)

दीपानां आकार भेदाः

मालादीपम महादीपं चक्रदीपं तथैवच।

कूर्माकार दीपंच मत्स्याकारम तथैव च।

कूटाकाप्रदीपंच धन्वाकारं तथैव च।

इत्येते दीप सङ्ख्या च आचरेदुत्सवं महत्। (मार्कण्डेयं)

स्थान भेदेन आकार भेदाः

प्राकाराणाम्तु सर्वेषां मालादीपं प्रशस्यते।

मण्टपे च महादीपे चक्रदीपंतु गोपुरे।

कूर्म महानसे चैव मत्स्यं पुष्पालये तथा।

कूटाकारं तु कूपे च धनधान्यालये धनुः।

दीपं मज्जन शालायां दण्डाकारं प्रशस्यते।

शङ्काकारम तु शयने मालाकारं प्रशस्यते। (मार्कण्डेयं)

नीराजनस्य लक्षणमाह

कृत्तिका दिवसाद्ब्रह्मन् न परेद्युःनिशामुखे।

महानसद्वारमासाद्य दीपान् प्रज्वालयेद्बहून्।

दीपकुम्बंसमादाय आधारोपरि विन्यसेत्।

दीपकुम्बं समभ्यर्च्य देवमिष्ट्वा विशेषतः।

षडङ्गन्यास कृत्वा तु भ्रामयेद्देवमूर्धनि।

दक्षिणं पादमारभ्य वामपादं तु पश्चिमम्।

भ्रामयेद्देव देवेशं मुखमध्ये विसर्जयेत्। (अनिरुद्धे)

एवं कृते फलविशेषमाह

एवं यःकारयेद्भक्त्या दीपोत्सवमनुत्तमम्।

इहलोके सुखं प्राप्य परलोके महीयते। (ई)

<u>अन्यत्र</u>

वत्सरे यस्तु राजेन्द्र दीपदानेन यत्फलम्।

तत्फलं कार्तिके मासि दीपारोपणके नरः।

एककालं द्विकालं वा त्रिकालं वाथ कार्तिके।

दीपमारोपयेद्देवं विष्णु सारूप्यतां नयेत्। (मार्कण्डेयं)

कृत्तिकामासे एकादश्यां विशेषयजनक्रमः

कृत्तिके मासि विप्रेन्द्र! शुक्लैकादशिका तु वा।

तस्यामुपोष्य रात्र्यांतु जागरेण जगत्पतिम्।

तत्कालोचित रागोत्थैः तोषयित्वा तु गीतकैः।

ब्राह्मे मुहूर्तेतु संप्राप्ते विशेषेण यजेद्विभुम्।

संश्रावयेद्गीतकानि स्तोत्राणि विविधाह्कथाः।

होमावसानं सर्वंतु सविशेषं समाचरेत्।

तत्फलमाह

तत्काले ये च गायन्ति तच्च श्रुण्वन्ति ये जनाः।

तेषांपुण्य फलावाप्तिं कः शक्नोत्यभिवर्णितुम्।

आचार्यः साधकवापि कुर्वीरन्नेव मुत्सवम्। (पारमे)

धनुर्मास पूजा विषयमाह

कोदण्डस्ते सवितरि यावन्मकर संक्रमम्।

तावद्दिनेषु प्रत्यूषे भगवन्तं जनार्दनम्।

यथावत्पूजयेद्देवि स्नानार्थं प्रोक्षणं चरेत्।

अलंकारासने नीत्वा भक्त गाथा समन्वितैः।

स्तोत्रैरन्यैर्नृत्त गीतैस्तोषयेद्धरिमव्ययम्।

मुद्गान्नं सुघृतं क्षीरं मरीच्यादि समन्वितम्।

सोपदंशं शर्करांच कदळीफल संयुतम्।

एवं प्रतिदिनं प्रातर्देवस्य विनिवेदयेत्। (श्रीः)

धनुर्मासे उषः काले पूजनस्य कारणमाह्

धनुर्मास दिनं वक्ष्ये केशवाराधनं परम्।

कोदण्डस्ते सवितरि प्रत्यूषे पूजयेद्धरिम्।

द्वादशाब्दार्चनं फलं यावद्दिनेनेकेन लभ्यते।

चापमासंतु देवानां रार्त्यन्तमितिहिस्मृतम्।

रार्त्यन्तं देवकालंस्यात् देवप्रीतिकरं परम्। (जयोत्तरे)

तत्काले मुद्गान्न निवेदन अवश्यकत्वम्

मार्गशीर्षे देवतानां प्रातःकाल इति स्मृतः।

प्रातःकाले महद्भिस्तु सात्विकः समुदाहृतः।

तस्मिन्नभिगमे काले पूजनं सात्विकं स्मृतम्।

मुद्गान्नं च गुळान्नम्च सात्विकम् परिचक्षते।

तत्काले सात्विकान्नेन वासुदेवं तु तर्पयेत्। (विष्णु,श्रीः)

एतत्पूजनस्य फलमाह

उत्सवं संपदायुष्यं पुष्टिदं मोक्षदं भवेत्।

द्वादशाब्दार्चनफलं दिनेनैकेन लभ्यते। (श्रीः)

धनुर्मासेअरुणोदयसमये दीपारोपणे फलविशेषमाह

तस्मिन् मासे विशेषेण देवदेवस्य सन्निधौ।

सर्पिषा तिलतैलैर्वा दीपारोपणमाचरेत्।

त्रिं शद्दिने विशेषेण दीपमारोपयेत्तु यः।

इह भुक्त्वाऽखिलान्भोगान् विष्णुलोकंसगच्छति। (ई)

उषः कालप्रसाद भक्षणे फल कथनमाह

अरुणोदय वेळायां धनुर्मासे जगत्पतेः।

निवेदितंतु मुद्गान्नं सहस्त्र फलदम् स्मृतम्।

भक्तेभ्योऽर्पित शेषंतु प्रसादं मोक्षसिद्धिदम्। (परमपुरुषं)

मार्ग शीर्षे अध्ययन उत्सवं कर्तव्य विधिः

उत्सवः कल्पयेत् दिव्यो मार्गशीर्षेऽथ मासके।

अध्ययनोत्सवः कुर्यात् देवदेवस्य सन्निधौ।

एकादश्यां पूर्वपक्षे विशेषं यजनं चरेत्।

ऋग्वेदं पूर्वदिग्भागे यजुर्वेदंतु दक्षिणे।

पश्चिमे सामवेदंतु अथर्वञ्चोत्तरे तथा।

आग्नेयेतु स्मृतिं जत्वा पुराणं नैऋतिं तथा।

इतिहासस्तु वायव्ये स्तोत्रमीशेतु कल्पयेत्।

आर्षः मानुषशास्त्रैश्च तन्त्रैर्नारायणात्मकैः।

एवं संस्थाप्य विधिवद् पूजयित्वा विशेषतः। (पाराशर्ये)

मोक्षोत्सवस्य कारणमाह

सर्वज्ञस्य जगत्स्त्रष्टुः स्वयोभून्मांचनास्मरत्।

ममकर्णात् समुद्भूतावसुरौ लोककण्ठकौ।

ब्रह्माणं हन्तुमारेब्यौ सोऽरोदीत् प्राकृतो यथा।....।

मयाहतौ तौ देवत्वं प्राप्तौ चक्राब्जधारिणौ।

मत्स्वरूपमपि ज्ञात्वा नमस्कृत्य कृताञ्जली।....।

ब्रह्मादयोऽपि त्वल्लोक सदृशं रत्नमन्दिरम्।

कल्पयित्वा त्वदर्चायां एकादश्युत्सवं चरेत्।....।

कृत्वोत्सवं तथाभूतमेकादश्यां विशेषतः।

विशन्ति मोक्षंतस्मात् सो मोक्षोत्सव इतीर्यते। (श्रीः)

उत्तर द्वारेण प्रवेशन फलमाह

तदा पश्यन्ति ये त्वां नमस्यन्तिच येजनाः।

उत्तर द्वार मार्गेण प्रविशन्ति च ये हरे।

ते वैकुण्ठमिमं प्राप्य मोदन्तां नित्य सूरिवत्। (श्रीः)

अन्यत्र

गुरुः कवाटमुद्घाट्य पथातेन हरिं नयेत्।

तदापश्यन्ति ये देवं तेन द्वारेण यान्ति ये।

महापातकिनोऽपि स्युर्मोक्षभाजो भवन्ति ते। (श्रीः,विष्णु)

अनन्तरम् भक्तबिम्बानां बहुमान विधिः

एकैकशो भक्तबिम्बानानाय्य च हरेः पुरः।

गन्धमाल्यं च तुळसीं दत्वा भक्तस्य मूर्धनि।

निक्षिप्य पादुकां चैव भूमौ भक्तान्निवेशयेत्।

तैरुक्ताभिर्गीताभिस्तोषयेत् भक्तवत्सलम्। (श्रीः)

अन्यत्र

देवमारोप्य देवीभ्यां विष्वक्सेनादिकानपि।

देवस्याभिमुखं स्थाप्यह्यलङ्कारासनोदितैः।

भोगैर्देवं समभ्यर्च्य भक्त बिम्बांश्च देशिकः।

सदागमादिकान् वेदांस्तथा दिव्याश्च संहिताः।

इतिहासपुराणानि स्तोत्रं दैवम्च मानुषम्।

वेदोपबृंहणंचान्यत्संस्कृतं प्राकृतं तु वा।

भाषान्तर गतं वापि तदा संश्रावयेद्विभुम्। (पारमे,ई)

अन्यत्र

वीणावेणुरवैश्चैव नृत्त गीतादिभिः सह।

मण्टपं द्विः परिभ्राम्य पुनः सिंहासने विभुम्।

समारोप्य समभ्यर्च्य सायङ्काले विशेषतः।

चतुःसहस्रिकामाद्यां द्रामिडीं स्तुतिमुत्तमाम्।

गापयेद्वैष्णवैस्तत्र नैवेद्यान्ते दिने दिने।

धामप्रदक्षिणं नीत्वा मन्दिरान्तःप्रवेशयेत्। (वासिष्टे,ई)

पुष्यमास उत्सव विधिः

मकरस्थे दिनकरे तत्काले सङ्क्रमे द्विजाः।

संस्नाप्य देवदेवेशं पञ्च विंशतिभिर्घटैः।

अलंकृत्य विशेषेण हविरादीन्निवेदयेत्।

तत्काले यजमानश्च गोभूस्वर्णादिकांस्तथा।

कूश्माण्ड व्रीहि दानंच कुर्याद्देवस्य तुष्टये। (ई)

अन्यत्र

पुष्येच मासि नक्षत्रे पौर्णमास्यामथापि वा।

आराधनं भगवत्स्सर्व पाप विनाशनम्। (पाद्मे)

प्रणयकलहोत्सव मास निर्णये

आरभ्य मकरान्मासान् मीनमासान्त मञ्जे।

शुक्रवारादि दिवसे प्रणयोत्सवमाचरेत्। (श्रीः)

अन्यत्र

तदन्येद्युर्देवदेवेशं समभ्यर्च्य विशेषतः।

अश्वरत्ने समारोप्य देवमुत्सवमुत्तमम्।

पूर्वोक्त विधिना कुर्यान्मृगयोत्सवमुत्तमम्। (ई)

डोलोत्सवस्य काल निरूपण्माह

उत्तरायण कालेवा दक्षिणायनमथापिवा।

शुक्लपक्षे विशेषेण पञ्चमी सप्तमीतुवा।

एकादशी वा दशमी द्वादशि पूर्णिमांतुवा।

समारभ्योत्सवं कुर्यात्सप्ताहंवा नवाहकम्।

पञ्चाहं वा त्रयहंवापि विभवेच्छानु सारतः। (ईश्वरं)

अन्यत्र

फल्गुन्यामुत्तराख्यायां कुर्याच्चन्द्रोदये नृप।

दृष्टे महोत्सवे वापि प्रदोषेवा विशेषतः।

चैत्रेतु शुक्लद्वादश्यां डोलारोपणमाचरेत्। (मार्कण्डेयं)

डोलायाः लक्षणमाह

द्वात्रिं शत् स्तम्भसंयुक्तं चतुर्विंशतिभिस्तुवा।

षोडशास्तम्भयुक्तंवा चतुद्वार समन्वितम्। (ईश्वरे)

डोलादीनां देवतानां निर्णयमाह

डोलायाः फलका मध्ये अनन्तं परिपूजयेत्।

पाशेषुचैव धर्माद्यष्टकंवा चतुष्टयं।

स्तम्भेषु गरुडव्यूह मभ्यर्च्य क्रमयोगतः।

तथैव चतुरोवेदान् रज्जुषु क्रम योगतः।

इतिहासपुराणानि वेदाङ्गानि तथैव च।

फलकायामष्ट दिक्षु पूजयेन्मुनि सत्तमाः।

व्यापकांस्तु चतुर्मन्त्रान् पदेषु परिपूजयेत्।

इष्ट्वाध्वजेषु सावित्री छत्रेषु व्याहृतीस्तथा।

प्रणवंतु पताकासु तोरणेषु स्वरांस्तथा।

व्यञ्जनानिच संपूज्य डोलां कृत्वा तु वाङ्मयीम्।

डोलायाः परितो दिक्षु इन्द्रादीन् परिपूजयेत्।

यद्वा सर्वेषु अनन्तंवा गरुडंवाऽपि पूजयेत्। (ई-श्रीः)

डोलोत्सव दर्शन फलमाह

डोलाचालन वेळायां ये पश्यन्ति श्रियःपतिम्।

इह ते प्राप्यचाभीष्टान् प्राप्नुवन्ति परांगतिम्। (ईश्वरे)

<u>अन्यत्र</u>

डोलारोपित देवेशं पश्यन्ति ब्रह्म वादिनः।

प्रयान्ति विष्णुसालोक्यंमुक्त्वामोक्षमिहैवतु। (मार्कण्डेयं)

अन्यत्र

यःकरोति जगद्भर्तुरिममुत्सव मञ्जजे।

संसारश्रृङ्खलामुक्तो मोक्षं प्राप्य स मोदते। (श्रीः)

माघमासे तिलपद्मपूजन क्रममाह

माघमासे सिते पक्षे पञ्चम्यां मधुविद्विषम्।

समाराध्य यथा शास्त्रं देवस्याग्रे महीतले।

कृष्णाजिनेन शुद्धेन भेदनच्छेदनादिना।...

तिलानां भारमेकंवा द्वौवा कृत्वा च वेदिकाम्।

त्रिमेखलां तिले तस्मिन् पद्माकार समाकृतीम्।..

अभ्यर्च्य गन्धपुष्पाद्यै स्तिलस्तैस्तदनन्तरम्।

अधीयानेषु विप्रेषु तुर्य वादित्र घोषणे।

तस्मै भातायेदमर्चयित्वा ऽक्षतादिभिः।

तिलपद्मं प्रदातव्यं सन्निधौ वारि पूर्वकम्।

दद्याच्च दक्षिणा तेभ्यो गुरवेच यथोदितम्। (पाद्मे)

तत्फलमाह

इत्थं तिलसरोजं ये दद्याद्धान्यादि संयुतम्।

पुनाति स पितृन् सर्वानात्मानं च परावरान्। (पाद्मे)

ध्रुवोत्सव कालनिर्णये

शिशिराद्येषु ऋतुषु त्रिष्वेकस्मिन् समाचरेत्।

शुक्लपक्षेऽथवा कृष्णे देवेशस्य ध्रुवोत्सवम्।

यजमानस्य जन्मव्रषे देव जन्मव्रषेपिवा।

प्लवाधिरोहणं कुर्याद्राजराष्ट्राभिवृद्धये।

तन्नक्षत्रानुसारेण सप्ताहंवा नवाहकम्।

पञ्चाहंवा त्रयहंवापि एकाहंवोत्सवं भवेत्। (ईश्वरे)

<u>अन्यत्र</u>

शैशिरे ग्रीष्म कालेवा शुक्लपक्षे शुभे दिने।

मासव्रष पूर्णिमायां वा कर्तव्यस्तु प्लवोत्सवः। (श्रीः)

प्लवस्य देवताः विषये

प्रोक्ष्य पुण्याह तोयेन सरस्तोयंच देशिकः।

दहनाप्यायनाभ्यांच संशोद्य विमलोदके।

क्षीरार्णवम् समावाह्य संपूज्याऽ र्घ्याभिद्विजाः।

प्लवे फणीन्द्रमावाह्य परितःकुमुदादिकान्।

समभ्यर्च्य अर्घ्यगन्धाद्यैः कुम्भेचावाह्य पूजयेत्। (ईश्वरे)

<u>अन्यत्र</u>

कुम्भे क्षीरार्णवेशंच भूमिं शेषं यथाक्रमम्।

प्लवे भूमिं विमानेच शेषमावाहयेद्गुरुः। (श्रीः)

क्षीरार्णव ध्यानं

क्षीरार्णवाधि देवेश पाशाब्जकर शोभित।

प्लवोत्सवार्थं देवेश तटाके सन्निधिंकुरु।

इति संप्राश्य वरुणं तटाके पूजयेद्रमे। (श्रीः)

भूदेवि ध्यानं

श्वेत वस्त्र धरे देवी श्वेतमाल्यैरलंकृते।

श्वेतद्वीपाधिपे देवी ध्रुवेस्मिन् सन्निधिं कुरु। (श्रीः)

शेषस्य ध्यानं

फणामणि सहस्त्रेण शोभितामर वन्दित।

नागेन्द्र विष्णु शयन ध्रुवरूपंभज प्रभो। (श्रीः)

फाल्गुन मासे श्रीकामव्रत दिन निश्चयः

दिनानि पञ्च शस्तानि वैष्णवानि चतुर्मुख।

तेषु व्रतमनुष्ठेयं सर्वाभिप्रेत साधनम्।

पक्षद्वयेऽपि द्वादश्यौ सिनीवाली कुहूस्तथा।

श्रवणक्षे दिनानिस्युर्मासेषु द्वादशाधिपः। (पाद्मं)

लक्ष्म्याः विषये श्रीकामव्रतम्

मासर्क्षे पौर्णमास्यां च यजनं स्नपनादिभिः।

फाल्गुने मासि फल्गुन्यां श्रीकामो हरिमर्चयेत्।

उपोष्यपूर्वं नियतो ध्यायन्नित्थं समाहितः।

विपुले बिल्वविपिने मध्ये पुष्करशोभिते।

महतटाके शिञ्जान पक्षिसङ्घसमाकुले।

मण्डले तत्र **माहेन्द्रे** प्राकारपरिवेषणे।

चतुर्द्वारे चतुर्दिक्षु कल्पकद्रुममण्डिते।

सौवर्णे बहुकल्याणरत्नस्तम्भसमन्विते।

सिंहासनवरे रत्नपद्मेऽष्टदळसंयुते।

कर्णिकाकेसरोपेते सुखासीनं श्रियासह।

पूर्वादिदिक्षु ध्यातव्या **वासुदेवादयोदले**।

आग्नेयादिषु कोणेषु चत्वारो हस्तिनःक्रमात्।

गुग्गुलश्च करण्डश्च दमकश्शललस्तथा।

शङ्खपद्मनिधीचापि सिंहविष्टरपार्श्वयोः।

अन्योन्याभिमुखौ भूरि वसन्तौ वसु सर्वदा।

भूम्यादयोऽष्टौ पूर्वादिदिक्षु चामरपाणयः।

इन्द्रादयश्च पूर्वादिदिक्ष्वष्टास्वष्टौ स्थिताः।

स्थिताश्चतुर्षु द्वारेषु वेत्रहस्तास्सकुञ्चिकाः।

कुब्जवेषाः स्त्रियो द्वारि पालयन्त्यो मनोहराः।

बलाकिनी विभीषिका च तथैव वनमालिनी।

शाङ्करी च क्रमादेताः पूर्वादिषु चतुर्मुख।

द्वाराणि पालिकाभिश्च पूर्णकुम्भैर्द्विजैस्तथा।

तोरणैर्दामभिमौक्तैर्दीपैरन्यैश्च मङ्गलैः।

परिष्कृतानि ध्यात्वैवं देवीं देवं च पूजयेत्।

श्रियं वा केवलं पद्मे कर्णिकायामवस्थितम्।

मण्डपे तत्र पूर्वोक्ते परिवारसमन्विते।

लक्ष्मीप्रसूनकैः पद्मैः होमो बिल्वादिपल्लवैः।

समिदाज्यैश्च मन्त्रेण श्रियश्चाष्टाक्षरेण च।

श्रीसूक्तानि चतुर्दिक्षु पाठ्यानि पृथिवीसुरैः।

आराध्याभिष्टुयादन्ते स्तोत्रैर्बहुविधैः श्रियम्।

ध्यानम्

नमामि देवि लोकानां जनयित्र्यब्जसम्भवे।

सर्वलोकेश्वरैरेशेशवल्लभे दुर्लभेऽधमैः।

वासुदेवाङ्गसंस्पर्श सुखैकरसभाजने।

नमस्ते शुभदे देवि देवानामधिदेवते।

यदृच्छयापि ते येषु कटाक्षाः पतितास्सकृत्।

क्षुद्रेष्वपि प्रगल्भन्ते ते त्रिलोकेश्वराः क्रमात्।

न स्पृशन्ति त्रिलोकेशानपि यान् वीक्षणानि ते।

सम्पाद्यन्ते क्षणात् क्षुद्रा नाकपृष्ठादपि च्युताः।

लावण्यादिगुणा यत्र काष्ठामश्नुवते पराम्।

तानि स्वादीयान्यङ्गानि देवि कः स्तोतुमर्हति।

त्वं माया त्वामविद्यासि वंशन्ती(त्वं शक्तिः)कर्मणामपि।

चैतन्यशक्तिस्त्वमसि प्रकृतिस्त्रिगुणात्मिका।

त्वमेव विद्या त्रय्यन्ता त्रयी च त्वं परावरे।

यस्यास्तवायुतांशांशे देव्यो वागादयस्थिताः।

सच्चिदानन्दरूपस्य परस्य परमात्मनः।

आनन्दादिमयीमूर्तिरविभक्ता भवत्यसि।

प्रभासि तस्य नित्या त्वं भास्वतः परमात्मनः।

सन्ध्या त्वमसि विप्राणां वन्दनीया दिने दिने।

भूर्भुवः स्वस्त्रयी च त्वं भूरसि त्वं भुवोऽसि च।

स्वरसि व्याहृतिश्चासि ऋग्यजुस्सामकारणम्।

त्वामाहुतिस्त्वमिष्टिश्च दक्षिणासि त्वमेव च।

सिद्धिश्च कर्मणां त्वत्तो नान्यास्ति कमलालये।

नीतिरान्वीक्षकी वार्ता विद्या चान्यासि लौकिकी।

दृष्ट्वा देवी त्वया हीनं मृतप्रायं जगत्त्रयं।

यत्नैरम्भोधिमथनप्रायै राविर्बभूविथ।

आनुषङ्गिकमुत्पन्नं प्राप्तमप्सरसामपि।

तादृगेवामृतादन्यदिन्दिरे हरिमन्दिरे।

हालाहलविषं चापि जन्मनः श्रेयसे तव।

प्रत्यूहरूपेणोत्पन्नं क्षीरवारिधिसम्भवे।

अभ्यर्हिता तथोत्पत्तिरेवं नाम मधुद्विषः।

कूर्मादि तिर्यग्योनित्वं यत्प्राप्तं परमात्मना।

त्वं सर्वलोकजननी जनको जगतां हरिः।

त्वया च विष्णुना चैतद्व्याप्तं स्थावरजङ्गमम्।

मानः कोशं तथा गोष्ठम् मा गृहम् मा परिच्छदम्।

माशरीरं कळत्रं च त्यजेया मा च सन्ततिम्।

श्रुतवान् शीलवान् दक्षो बुद्धिमान्वित्तवानृजुः।

वृत्तवान् बन्धुमान् श्रीमान् पशुमान् धान्यवानपि।

गुणवान् कीर्तिमान् लोके तथापि जनवान् प्रभुः।

आयुष्मान् विजयी भूमांस्तथैवारोग्यवानपि।

श्लाघ्यवाग्देवि पुरुषः कटाक्ष विषयात्तव।

गुणैर्यथोक्तै रहितस्त्वद्दर्शन विवर्जितः।

क्रोडामूर्तिर्हरेर्यस्या वक्षोभूमिस्सनातनी।

आनन्त्यात्तवकल्याणि गुणानां वर्णने क्षमः।

न वाचस्पतेरन्येषां दूरेस्यान्मादृशां स्थितिः।

प्रसीद देवि पद्मे त्वं पद्महस्ते शुचिस्मिते।

पद्मासने पद्मयोनेर्जनयित्री हरिप्रिये।

पद्मप्रिये नमस्तुभ्यं विष्णोर्वक्षस्थलालये।

स्तुत्यन्तमित्थमाराध्य देव्यस्सर्वाः श्रियादयः।

(अर्हणम् चोपवीतम् च वर्जयित्वोपचर्यया।

ध्यात्वा यथोक्तमार्गेण यद्वा धूमध्वजार्चनम्।)

यावज्जीवं श्रियं देवीमर्चयन् सम्पदं परान्।

इहानुभूय भूयोपि परत्र श्रियमश्नुते।

यद्यत्कामयमानेन पुरुषेणार्चनं श्रियः।

लभते तत्तदेवेह फलभेदैः किमीरितैः।

2-आरोग्यकामस्सवित्रे मण्डले रक्तपङ्कजे।

आसीनं विष्टरे पीतकौशेयवसनं हरिम्।

निष्टप्ततपनीयामं चतुर्भुजमधोक्षजम्।

प्रसादसुमुखं सेव्यं दिव्याभरणभूषितम्।

देवीसहायं कल्याणम् केवलं वा चतुर्मुख।

पूर्वाद्यष्टदळासीनं शक्त्यष्टसमुपासितम्।

एवं ध्यात्वार्चयेन्नित्यमारोग्यं परमश्नुते।

अनन्यलभ्यमारोग्यं सर्वं लब्ध्वा ततः परम्।

दिनानि पञ्चशस्तानि वैष्णवानि चतुर्मुख।

तेषु व्रतमनुष्ठेयम् सर्वाभिप्रेतसाधनम्।

पक्षद्वयेपि द्वादश्यौ सिनीवाली कुहूस्तथा।

श्रवणर्क्षं दिनानिस्युर् मासेषु द्वादशास्वपि। (इति पाद्मसंहितयां-15a 73-120)

उपचारे विशेषविधिः

अर्हणं चोपवीतं च वर्जयित्वोपचर्यया।

ध्यात्वा यथोक्त मात्रेण यद्वा धूमध्वजार्चनम्।

उत्सवंच श्रिया देव्या सार्धं तद्वन्मधु द्विषः।

यावज्जीवं श्रियं देवीमर्चयन् संपदम् पराम्। (पाद्मं)

एतदुत्सव कृते फलमाह

यद्यत्कामयमानेन पुरुषेणार्चनं श्रियः।

लभते तत्तदेवेह फलभेदैः क्रमोदितैः।

एवं ध्यात्वार्चयेन्नित्यम् आरोग्यं फलमश्नुते।

अनन्यलभ्यमारोग्यं सर्वं लब्ध्वा ततः परम्। (पाद्मं)

मीनमासे विवाहोत्सव विषयः,तत्फलानि

फाल्गुने मासि फल्गुण्यां तैष संक्रमणेऽथवा।

देवी विवाहंकुर्वीत भक्ति मुक्तिप्रदं तथा। (वि-तिलके)

एवं प्रतिसंवत्सरं सकलोत्सवान् कृते फलनिरूपणमाह

प्रति संवत्सरंत्वेवं देवस्य सकलोत्सवान्।

यःकारयति विप्रेन्द्राः सतु साम्राज्य संयुतः।

इहलोके सुखंभुक्त्वा चिरं भोगान् यथेप्सितान्।

देह सन्यासकालेतु प्राप्नोति भगवत्पदम्।

इति संकीर्तिताः सम्यग्देवस्य सकलोत्सवाः। (ईश्वरम्)

<u>अन्यत्र</u>

एवंबहुविधा देवीह्युत्सवाः सन्ति भामिनी।

प्राधान्यतोऽहमवदमेतेष्वन्यतमं तु यः।

करोतिभक्त्या तस्याहं प्रसन्नः संपदायुषम्।

पुत्रपौत्रादि वृद्धिंच ज्ञानंचापि महत्तरम्।

ददामिचान्ते मल्लोकं वैकुण्ठ पदमाप्नुयात्। (श्रीः)

<u>॥ इति श्रीपाञ्चरात्रे वचनसारे द्वितीयोभागः ॥</u>

****

श्रीः

श्रीमते रामानुजाय नमः

जितन्ता स्तोत्राणि

प्रथम जितन्ता स्तोत्रम्

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन।

नमस्तेस्तु हृषीकेश महापुरुष पूर्वज।

देवानां दानवानां च सामान्यमधिदैवतम्।

सर्वदा चरणत्वं त्वं व्रजामि शरणं तव।

एकःत्वमसि लोकस्य स्रष्टा संहारकस्तथा।

अध्यक्षश्चानुमन्ता च गुणमाया समावृतः।

संसार सागरं घोरमनन्तः क्लेशभाजनम्।

त्वमेवशरणं प्राप्य निस्तरन्ति मनीषिणः।

नतेरूपं नचाकारो नायुधानि न चास्पदम्।

तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे।

नैवकिञ्चित् परोक्षन्ते प्रत्यक्षोसि न कस्यचित्।

नैवकिञ्चिदसिद्धंते न च सिद्धोसि कस्यचित्।

कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम्।

योगानां परमां सिद्धिं परमं ते पदं विदुः।

अहं भीतोस्मि देवेश संसारेस्मिन् भयावहे।

पाहिमां पुण्डरीकाक्ष न जाने शरणं परम्।

कालेष्वपिच सर्वेषु दिक्षु सर्वासुचाच्युत।

शरीरे च गतौचापि वर्धते मे महद्भयम्।

त्वत्पादकमलादन्यत् न मे जन्मान्तरेष्वपि।

निमित्तं कुशलस्यास्ति योन गच्छामि सद्गतिम्।

विज्ञानं यदिदं प्राप्तं यदिदं स्थानमार्जितम्।

जन्मान्तरेपि मे देव मा भूत्तस्यपरिक्षयः।

दुर्गतावपि जातायां त्वद्गतोमे मनोरथः।

यदि नाशं न विन्देत तावताऽस्मि कृती सदा।

न कामकलुषं चित्तं ममते पादयोस्थितम्।

कामये वैष्णवत्वं च सर्वजन्मसु केवलम्।

सर्वेषु देशकालेषु सर्वावस्थासुचाच्युत।

किंकरोस्मि हृषीकेश भूयोभूयोस्मि किंकरः।

इत्येवमनयास्तुत्या स्तुत्वा देवं दिनेदिने।

किंकरोस्मीतिचात्मानं देवायैवं निवेदयेत्।

यच्चापराधं कृतवानज्ञानात् पुरुषोत्तम।

मद्भक्त इति देवेश तत्सर्वं क्षन्तुमर्हसि।

अहंकारार्थकामेषु प्रीतिरद्यैव नश्यतु।

त्वां प्रपन्नस्य मे देव वर्धतां श्रीमति त्वयि।

क्काहमत्यन्त दुर्बुद्धिः क्कचात्महित वीक्षणम्।

यद्धिदं मम देवेश तदाज्ञापय माधव।

सोहं ते देवदेवेश नार्चनादौ स्तुतौ नच।

सामर्थ्यवान् कृपामात्रमनोवृत्तिः प्रसीद मे।

उपचारापदेशेन कृतानहरहर्मया।

अपचारानिमान् सर्वान् क्षमस्वपुरुषोत्तम।

इति प्रथम जितन्ता स्तोत्रं संपूर्णम्

****

अथ द्वितीय जितन्ता स्तोत्रम्

जितन्ते पुण्डरीकाक्ष पूर्णषाड्गुण्य विग्रह।

परानंदपरंब्रह्मन् नमस्ते परमात्मने।

नमस्ते पीतवसन नमःकटकधारिणे।

नमोनीलालकाबद्ध वेणी सुंदर विग्रह।

स्फुरद्वलय केयूर नूपुराङ्गद भूषण।

शोभनैर्भूषिताकार कल्याणगुणराशये।

करुणापूर्ण हृदय शङ्ख चक्र गदाधर।

अमृतानन्द पूर्णाभ्यां लोचनाभ्यां विलोकय।

कृशं कृतघ्नं दुष्कर्म कारिणं पाप भाजनम्।

अपराध सहस्त्राणामाकरं करुणाकर।

कृपया मां केवलया गृहाण मधुसूदन।

विषयार्णवमग्नंमामुद्धर्तुं त्वमिवार्हसि।

पितामाता सुहृद्बंधुः भ्रातापुत्रस्त्वमेवहि।

विद्या धनं च काम्यञ्च नान्यत्किञ्चित्वया विना।

यत्रकुत्र कुलेवासो येषुकेषु भवोस्तुमे।

तवदास्यैक भोगेस्यात्सदा सर्वत्रमे गतिः।

मनसा कर्मणा वाचा शिरसा वा कथञ्चन।

त्वांविना नान्यमुद्दिश्य करिष्ये किंचिदप्यहम्।

पाहि पाहि जगन्नाथ कृपया भक्तवत्सल।

अनाथोहमधन्योहमकृतार्थः कथंचन।

नृसिंहःपापकृत्क्रूरो वंचको निष्ठुरस्सदा।

भवार्णवेनिमग्नम्मां अनन्यं करुणोदधे।

करुणा पूर्ण दृष्टिभ्यां दीनं मामवलोकय।

त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो।

मयाकृतानि पापानि त्रिविधानि पुनः पुनः।

त्वत्पादपङ्कजं प्राप्तुं नान्यत्वत्करुणां विना।

साधनानि प्रसिद्धानि त्वामुद्दिश्यःकृतानिवै।

भक्त्येक लभ्यः पुरुषोत्तमोसौ जगत्प्रसूतिस्थिति नाश हेतुः।

अकिञ्चनोऽनन्य गतिः शरण्य गृहाण मां क्लेशिनमंबुजाक्ष।

धर्मार्थ काममोक्षेषु नेच्छामम कदाचन।

त्वत्पाद पङ्कजास्वाद जीवितुं धीयतां मम।

कामये तावकत्वेन परिचर्यानु वर्त्मना।

नित्यकिंकर भावेन परिगृह्णीष्व मां विभो।

लोकं वैकुण्ठ नामानं दिव्यषाङ्गुण्यविग्रहम्।

अवैष्णवानामप्राप्यं गुणत्रय विवर्जितम्।

नित्यसिद्धैस्समाकीर्णं त्वन्मयैः पञ्च कालिकैः।

सभा प्रासादसंयुक्तं वनैश्चोपवनैर्युतम्।

वापीकूपतटाकैश्च वृक्षष्षण्डैस्समन्वितम्।

अप्राकृतं सुरैर्वंद्यमयुतार्क समप्रभम्।

प्रकृष्ट सत्वसंपन्नं कदा द्रक्ष्यामि चक्षुषा।

क्रीडंतं रमया सार्धं लीलाभूमिषु केशवम्।

मेघश्यामं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा।

उन्नसं चारु वदनं बिंबोष्ठं शोभिताननम्।

विशाल वक्षसं श्रीशं कंबुग्रीवं जगद्गुरुम्।

आजानुबाहुं परिघमुन्नतांसं मधुद्विषम्।

विशाल निम्ननाभिं तं आपीनजघनं हरिम्।

करभोरुं श्रियः कान्तं कदाद्रक्ष्यामि चक्षुषा।

शङ्ख चक्र गदापद्मैरङ्कितं पाद पङ्कजम्।

शरश्चंद्र शताक्रान्त नखराजि विराजितम्।

सुरासुरैर्वन्द्यमानं ऋषिभिर्वन्दितं सदा।

कदा वा देवमूर्धानं मामकं मण्डयिष्यति।

कदा गंभीरया वाचा श्रियायुक्तो जगत्पतिः।

चामरव्यग्रहस्तं मां एवं कुर्वीति वक्ष्यसि(ति?)।

कदाहं राजराजेन गणनाथेन चोदितः।

चरेयंभगवत्पादपरिचर्यानु वृत्तिषु।

शान्ताय च विशुद्धाय तेजसे परमात्मने।

नमो भगवते विष्णो वासुदेवामितद्युते।

नमस्सर्व गुणातीत षड्गुणायादि वेधसे।

सत्यज्ञानानन्तगुण ब्रह्मणेपरमात्मने।

चतुःपञ्च नवव्यूह दश द्वादशमूर्तये।

नमस्ते वासुदेवाय ब्रह्मणे चतुरात्मने।

नमोऽनन्ताय विश्वाय विश्वातीताय चक्रिणे।

नमस्ते पञ्चकालज्ञ पञ्चकालपरायण।

पञ्चकालैकमनसां त्वमेव गतिरव्ययः।

परे व्योम्निस्थितं देवं निरवद्यं निरञ्जनम्।

अप्रमेयमजं विष्णुं अब्जनाभं सुरेश्वरम्।

वागतीतं परं शान्तं शरणं त्वां गतोस्म्यहम्।

वर्याद्वन्द्वातिरिक्तं त्वां कौस्तुभोद्भासि वक्षसम्।

विश्वरूपं विशालाक्षं कदाद्रक्ष्यामि चक्षुषा।

<u>मोक्षं सालोक्य सारूप्यम् प्रार्थये न कदाचन।</u>

<u>इच्छाम्यहं महाबाहो सायुज्यं तव सुव्रत।</u>

सकलाकरणातीत किंकरोस्मितवानघ।

पुनः पुनःकिंकरोस्मि तवाहं पुरुषोत्तम।

आसनाद्यनुयागान्तं अर्चनं यन्मया कृतम्।

भोगहीनं क्रियाहीनं मन्त्रहीनमभक्तिकम्।

तत्सर्वं क्षम्यतां देव दीनं मामात्मसात्कुरु।

इति स्तोत्रेण देवेशं स्तुत्वामधुनिघातिनम्।

यागावसान समये देवदेवस्य चक्रिणः।

नित्यं किंकर भावेन स्वात्मानं विनिवेशयेत्।

इति द्वितीय जितन्ता स्तोत्रं संपूर्नम्।

****

तृतीय जितन्ता स्तोत्रम्

जितन्ते पुण्डरीकाक्ष नमस्ते विश्व भावन।

नमस्तेस्तु हृषीकेश महापुरुषपूर्वज।

विज्ञापनमिदंदेव श्रुणु त्वं पुरुषोत्तम।

नर नारायणाभ्यांच श्वेतद्वीप निवासिभिः।

विष्वक्सेन प्रभृतिभिः कुमुदाद्यैश्च पार्षदैः।

नारदाद्यैर्मुनि गणैः सनकाद्यैश्च योगिभिः।

ब्रह्मेशाद्यैस्सुर गणैः पञ्चकाल परायणैः।

पूज्यसे पुण्डरीकाक्ष दिव्यमन्त्रैर्महर्षिभिः।

पाषण्ड धर्म संकीर्णे भगवद्भक्ति वर्जिते।

कलौ जातोस्मिदेवेश सर्वधर्म बहिष्कृते।

कथंत्वामसदाचारः पापप्रसव भूरहम्।

अर्चयामि दया सिंधो पाहि मां शरणागतम्।

तापत्रय तवाग्नौ मां दह्यमानं सदाविभो।

त्राहि मां पुण्डरीकाक्ष केवलं कृपया तव।

जन्ममृत्युजराव्याधि दुःखसंतप्त देहिनाम्।

पालयाशु दृशादेव तव कारुण्य गर्भया।

इंद्रियाणि मया जेतुमशक्यं पुरुषोत्तम।

शरीरं ममदेवेश व्याधिभिः परिपीडितम्।

मनोमे पुण्डरीकाक्ष विषयानेव धावति।

वाणी मम हृषीकेश मिथ्या पारुष्य दूषिता।

एवं साधन हीनोऽहं किं करिष्यामि केशव?।

रक्षमां कृपया कृष्ण भवाब्धौ पतितं सदा।

अपराध शतंचैव सहस्त्रमयुतं तथा।

अर्बुदंचाप्यसंख्येयं करुणाब्धे क्षमस्वमे।

यच्चापराधं कृतवानज्ञानात् पुरुषोत्तम।

मद्भक्त इति देवेश तत्सर्वं क्षंतुमर्हसि।

अज्ञात्वादप्यशक्तत्वादालस्यादुष्ट भावनात्।

कृतापराधं कृपणं क्षंतुमर्हसि मां विभो।

अपराधसहस्त्राणि क्रियन्तेऽहर्निशं मया।

तानि सर्वाणि मे देव क्षमस्व मधुसूधन।

यज्जन्मनः प्रभृतिमोहवशंगतेन

नानापराधशतमाचरितं मया ते।

अंतर्बहिश्च सकलं तव पश्यतो मे

क्षंतुत्वमर्हसि हरे करुणा वचेन।

कर्मणामनसा वाचा या चेष्टा मम नित्यशः।

केशवाराधने सा स्यात् जन्मजन्मान्तरेष्वपि।

इति तृतीयजितन्ता स्तोत्रम् सम्पूर्णम्।

****

अथ चतुर्थ जिन्ता स्तोत्रम्

जितन्ते पुण्डरीकाक्ष नमस्ते विश्व भावन।

नमस्तेस्तु हृषीकेश महा पुरुष पूर्वज।

नमस्ते वासुदेवाय शान्तानन्त चिदात्मने।

अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते।

अच्युतायाविकाराय तेजसां निधये नमः।

प्रधानपुरुषेशाय नमस्ते पुरुषोत्तम।

क्लेशकर्माद्यसंस्पृष्ट पूर्णषाड्गुण्य मूर्तये।

त्रिभिर्ज्ञान बलैश्वर्यवीर्यशक्त्यांतरात्मने।

त्रियुगाय नमस्तेस्तु नमस्ते चतुरात्मने।

चतुः पञ्चनवव्यूह दश द्वादश मूर्तये।

अनेक मूर्तयेतुभ्यममूर्तायैक मूर्तये।

नारायण नमस्तेस्तु पुण्डरीकायतेक्षण।

सुभ्रूललाट सुनस सुस्मिताधरपल्लव।

पीनवृत्तायत भुज श्रीवत्सकृतलक्षण।

तनुमध्य विशालाक्ष पद्मनाभनमोस्तुते।

विलासविक्रमाक्रांतत्रैलोक्यचरणांबुज।

नमस्ते पीतवसन स्फुरन्मकरकुण्डल।

स्फुरत्किरीटकेयूर हारकौस्तुभभूषण।

पञ्चायुध नमस्तेस्तुनमस्ते पञ्चकालिक।

पञ्चकालपरैकान्तियोगक्षेमवह ! प्रभो।

नित्यज्ञानबलैश्वर्य भोगोपकरणाच्युत।

नमस्तेब्रह्मरुद्रादि लोकयात्रापरिच्छद।

जन्मप्रभृतिदासोस्मि शिष्योस्मितनयोस्मिते।

त्वं च स्वामि गुरुर्माता पिता च मम माधव।

अपि त्वां भगवन् ब्रह्मन् सर्वश्शक्रोमहर्षयः।

द्रष्टुं यष्टुमपिस्तोतुं नहिस्मर्तुमनीशते।

तापत्रय महाग्राह भीषणे भवसागरे।

मज्जतां नाथनौरेष प्रणतस्त्वत्पदार्पिता।

अनाथाय जगन्नाथ शरण्य शरणार्थिने।

प्रसीद सीदते मह्यं नमस्ते भक्त वत्सल।

मन्त्र हीनं क्रियाहीनं भक्ति हीनं यदर्चनम्।

तत्क्षन्तव्यं प्रपन्नानामपराध सहोह्यसि।

अज्ञानाद्यदि वाज्ञानादशुभं यन्मयाकृतम्।

क्षन्तव्यं तदशेषेण दास्येन च गृहाणमां।

सर्वेषु देश कालेषु सर्वावस्थासुचाच्युत।

किंकरोस्मि हृषीकेश भूयो भूयोस्मि किंकर।

इति चतुर्थ जितन्तास्तोत्रं संपूर्णम्।

****

पञ्चम जितन्ता स्तोत्रम्।

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।

नमस्तेस्तु हृषीकेश महापुरुष पूर्वज।

नमस्ते वासुदेवाय शान्तानन्त चिदात्मने।

अजिताय नमस्तुभ्यं षाड्गुण्य निधये नमः।

महाविभूति संस्थाय नमस्ते पुरुषोत्तम।

सहस्त्रशिरसे तुभ्यं सहस्त्रचरणाय ते।

सहस्त्रबाहवे तुभ्यं सहस्त्रनयनायते।

अच्युताय नमस्तुभ्यं एकमूर्ताय ते नमः।

अनेकमूर्तये तुभ्यमक्षराय च ते नमः।

व्यापिने वेदवेद्याय नमस्ते परमात्मने।

चिन्मात्ररूपिणे तुभ्यं नमस्त्रैयन्त मूर्तये।

अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः।

नेदिष्ठाय यविष्ठाय कनिष्ठाय च ते नमः।

पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिने नमः।

कल्पना क्रोडरूपाय सृष्टि स्थित्यन्त हेतवे।

नमस्ते गुणरूपाय गुणरूपादि वर्तिने।

व्यस्ताय च समस्ताय समस्तव्यस्त रूपिणे।

आदिमध्यान्त शून्याय तत्वस्थाय नमो नमः।

प्रणव प्रतिपाद्याय नमः प्रणवरूपिणे।

लोक यात्राप्रसिद्ध्यर्थं सृष्टि ब्रह्मादि रूपिणे।

नमस्तुभ्यं नृसिंहादि मूर्ति भेदाय विष्णवे।

विपाकैःकर्मभिःक्लेशैरस्पृष्ट वपुषे नमः।

नमोब्रह्मण्य देवाय तेजसां निधये नमः।

नित्यसाधारणानेक लोकरक्षा परिच्छद।

सच्चिदानंद रूपाय वरेण्याय नमो नमः।

यजमानाय यज्ञाय यष्टव्याय नमोनमः।

इज्याफलात्मने तुभ्यं नम इज्यादि शीलिने।

नमःपरम हंसाय नमस्सत्व गुणाय च।

स्थिताय परमव्योम्नि भूयो भूयो नमो नमः।

संसार विषयावर्त संकुले च महाभये।

अपारेदुस्थरेगाधे पतितं कर्मभिः स्वकैः।

अनाथमगतिं भीरुं दयया परया हरे।

मामुद्धर दयासिंदोधो सिन्धोरस्मात्सुदुस्तरात्।

मन्त्रहानिम् क्रियाहानिम् हानिम्वा न्यामत्वदर्चने।

क्षमस्व मम देवत्वं अपराध सहोह्यसि।

अपराध सहस्त्रभाजनं पतितं भीम भवार्णवोदरे।

अगतिंशरणागतिं हरे ! कृपया केवलमात्मसात्कुरु।

जन्मप्रभृति दासोस्मि शिष्योस्मि तनयोस्मिते।

त्वं च स्वामि गुरुर्माता पिता च मम माधव।

मन्त्रहीनं क्रियाहीनं भक्ति हीनं यदर्चितम्।

तत्सर्वं क्षम्यतां देव दीनंमामात्मसात्कुरु।

नाहंहितं विजानामि त्वां व्रजाम्येवकेवलम्।

बुद्ध्यैवं नय गोविन्द मुक्त्युपायेन वर्त्मना।

त्वमेव वेत्सि श्रेयो मे नेदमेतदितीतिच।

बुद्धियोगं च मे देहि येनत्वामुपयांयहम्।

इति पञ्चम जितन्तास्तोत्रं संपूर्णम्।

****

षष्टम जितन्ता स्तोत्रम्।

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन।

नमस्तेस्तु हृषीकेश महापुरुष पूर्वज।

श्रीमद्वारवतीनाम वर्धतां विजयी भवान्।

दिव्यं त्वदीयमैश्वर्यं निर्मर्याद विजृंभितम्।

देवी भूषायुधैर्नित्यैर्मुक्तैर्मोक्षैक लक्षणैः।

सत्वोत्तरैस्त्वदीयैश्च संगस्थाभिरसस्तव।

प्राग्द्वार गोपुरवर प्रासाद मणिमण्डपाः।

शालिमुद्ग तिलादीनां शालाशैल कुलोज्वलाः।

रत्नकाञ्चन कौशेय क्षौमक्रमुक शालिकाः।

शय्यागृहाणि पर्यङ्कवर्योःस्थूलासनानि च।

कनत्कङ्कण भृङ्गार पतत्ग्रह कळांचिकाः।

छत्रचामर मुख्याङ्ग सन्तु नित्यापरिच्छद।

अस्तुनिस्तुलमव्ययं नित्यमभ्यर्चनं तव।

पक्षेपक्षे विजृंभंतां मासि मासि महोत्सवाः।

मणिकाञ्चन चित्राणि भूषणाद्यंबराणि च।

काश्मीर सारकस्तूरि कर्पूराद्यनुलेपनम्।

कोमळानि च दामानि कौसुमैस्सौरभोद्गमैः।

धूपाःकर्पूर दीपाश्च सन्तुनित्या परिच्छदाः।

नृत्त गीतयुतं वाद्यं नित्यमत्र विवर्धताम्।

श्रोत्रेषुनस्सुधाधाराः कल्पतां काहळस्वनैः।

कन्दमूल फलाद्रव्यं कालेकाले विवर्धताम्।

सूपापूप घृत क्षीर शर्करा सहितं हविः।

घनसार शिरोतक्रं क्रमुकाष्टदळान्वितम्।

विमलानिच तांबूल दळानि स्वीकुरु प्रभो।

प्रीति भीतियुतोभूयान्नित्यं परिजनस्तव।

भक्तिमन्तिप भुञ्जंतु पौरजान पदैस्सह।

धरणीधनरत्नानि वितरंतु चिरंतव।

कैङ्कर्यमखिलं सर्वे कुर्वंतु क्षोणिपालकाः।

प्रेमदृग्सदृशं स्मेरं प्रेक्षमाणस्त्वदाननम्।

महान्तस्संततस्संतो मङ्गळानि प्रयुञ्जताम्।

पापमेव भवेन्नित्यम् पालयन् कुशली भवान्।

इति षष्टम जितन्ता स्तोत्रम्।

इति जितन्ता स्तोत्राणि संपूर्णम्।

****

अनुबन्धम्

त्वया विना न मे किञ्चित् मांविना तवकस्तथा।

तस्मान्मामात्मसात्कर्तुं प्रसीद परमेश्वर।

भूमौ स्खलित पादानां भूमिरेवाऽवलंबनम्।

त्वयि विप्रतिपन्नानां त्वमेव शरणं विभो।

ज्ञानतोऽज्ञानतोवापि यथोक्त मकृतं मया।

तत्सर्वं पूर्णमेवास्तु सुतृप्तोभव सर्वदा।

ओमच्युत जगन्नाथ मन्त्रमूर्ते सनातन।

रक्ष मां पुण्डरीकाक्ष क्षमस्वाज प्रसीद ओं।

****

Books Published by Kriyasagaram for free of cost with Bagavat and Bagavata Krupa

Volume	Contents
1	Vasudeva Punhavachanam, Thiruaradhanam, Agnikaryam, Mahotsavam and Cakrabjamandala puja vidhi
2	Prathista vidhi
3	Vacanasaram (I) – Pramanas of Thiruaradhanam
4	Vacanasaram (II) - Pramanas of Mahotsavam
5	Archana (Namavali) of various divyadesa perumal
6	Dhyana sloka ratnavalai
7	Kriyakairava chandrika (I)
8	Kriyakairava chandrika (II)
9	Snapana Vidhi
10	Paramapurusha Samhitha
11	Bruhadbrumha Samhitha
12	Sriranga Mahatmyam(I)
13	Sriranga Mahatmyam(II)
14	Panchamrutham
15	Panchakala prakriya
16	Thula Kaveri Mahatmyam